(*c*) दृशो CRB.

Śikhariṇī metre.

1434.

गुणा यत्र न पूज्यन्ते गुणिनां तत्र का कथा ।
नग्नक्षपणके ग्रामे रजकः किं करिष्यति ॥

(आ) CRC 8.141, CPS 324.19. (Cf. No. 264).
(ई) IS 2137, SRHt 42.33, Subh 187.
(*a*) गुणाः IS.
(*b*) का त° गु° गतिः SRHt, Subh; गुणतां IS.
(*c*) नग्नक्षपणकग्रामे CRC, CPS, SRHt; °णकः IS.

1435.

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते किमिति जगतां विस्मयपदम् ।
यथा जीमूतोऽयं लवणजलधेर्वारि मधुरं
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम् ॥

(आ) CRB 4.30. (Cf. Nos. 341, 414, 631, 659).
(इ) Bhavabhūti's Guṇaratnakāvya 6.
(ई) SRBh 51.236, IS 2138, SRK 13.30.
(*b*) तदिदमपि नो [कि°] SRBh, SRK.
(*c*) महामेघः क्षारं पिबति कुरुते वारि मधुरं SRBh, SRK.
(*d*) पी° क्षी° tr. SRBh, SRK.

Śikhariṇī metre.

1436.

गुणिनां निर्गुणानां च दृश्यते महदन्तरम् ।
हाराः कण्ठगताः स्त्रीणां नूपुराणि च पादयोः ॥

(आ) CvTb 8.18.
(ई) SRBh 156.160, SuM 23. 38, SRK 233. 34, IS 2147, Subh 16 and 278.
(*a*) गुणानां IS; सगुणानां निगु° CvTb; अगुणीनां IS.
(*c*) हारः CvTb, SRBh; हारा IS; °गतः CvTb, SRBh; °गता IS.
(*d*) पादयो CvTb.

1437.

गुणिनोऽपि हि सीदन्ति गुणग्राही न चेदिह ।
सगुणः पूर्णकुम्भोऽपि कूप एव निमज्जति ॥

(आ) CNW 107.

(ई) SRBh 81.24, IS 2151.

(*b*) चेद्यदि (*sic !*) CNW.

1438.

गुणेषु यत्नसाध्येषु यत्ने स्वात्मन्यवस्थिते ।
अयं गुणवतां धुर्यः त्यजेदल्पान् सहेतुकः ॥

(आ) CRP 8.116, CRBh I 8.127.

(*cd*) धुर्यस्त्यजल्पन्सहेतुकः CRP; धुर्यस्त्यजल्पन्सहेतकः CRBh I.

1439.

गुणेष्वेवादरः कार्यो न वित्तेषु कदाचन ।
सुलभं धनिनां द्रव्यं दुर्लभं हि गुणार्जनम् ॥

(आ) CvTb 7.25, CM 183.

(इ) Vet *ad* 2, p. 113.

(*c*) शुलभं CvTb; गुणिनां Vet.

(*d*) दुर्लभा धनिनां गुणाः Vet.

1440.

गुणैर्न किंचिद् विदुषां प्रयोजनं
खलोऽर्थभागी सुगुणश्च निर्धनः ।
यथा हि काको लभते गृहाद् बलिं
तथा न हंसो न शुको न चातकः ॥

(आ) CRC 8.128, CPS 285.35.

Vaṁśastha metre.

1441.

गुरवो यत्र पूज्यन्ते धान्यं यत्र सुसंचितम् ।
न दण्डकलहौ यत्र तत्र शक्र वसाम्यहम् ॥

(आ) CvP IV 3.7, CvGt 3.5, CvTb 3.9, CvH 3.9, CNI I 138, CnT II 5.2, CnT III 3.14, CnT VI 52. (Cf. No. 783).
(ई) IS 2168, Subh 104. (Cf. IS 2136, Subh 196).
(*a*) पुज्यन्ते CvGt.
(*b*) धा° य° tr. CvH, Subh; धान्य CvTb.
(*c*) अदंतकलहो [न द°] CvP IV, CNI I; अदंडकलहो [न द°] CvTb; अदन्तकलहो CvGt; दन्तकलहो CvH.
(*d*) श्रीर्निवसेच्चिरं CNI; श्रीम्श्चलभवेत् CvH; श्रीसंक्रमोथवैत् CvGt; वचाम्य् CvTb.

1442.

गुरुणा येन पाठितं शिष्यं हि वर्णमात्रकम् ।
भुवि न विन्दते किंचिन् मुषिकहृतसम्पदम् ॥

(आ) CRT 8.53.

1443.

गुरोरधीताखिलवैद्यविद्यः
पीयूषपाणिः कुशलः क्रियासु ।
गतस्पृहो धैर्यधरः कृपालुः
शुद्धोऽधिकारी भिषगीदृशः स्यात् ॥

(आ) CRB 5.13.
(ई) SRBh 43.1, IS 7862, SRK 83.1 (ascribed to Vaidyajivana).

Upajāti metre (Upendravajrā and Indravajrā).

1444.

गृहादर्था निवर्तन्ते श्मशानान्मित्रबान्धवाः ।
येन तत् सह गन्तव्यं तत् कर्म सुकृतं कुरु ॥

(आ) CRC 6.74, CPS 167.92. (Cf. No. 1231).
(*c*) त्वयेह [तत् स°] CPS.

1445.

गृहे चाभ्यन्तरे द्रव्यं लग्नं चैव तु दृश्यते ।
अशेषं हरणीयं च विद्या न ह्रियते परैः ॥

(इ) GP 1.115. 82.

1446.

गृहेऽप्यर्थान् परित्यज्य श्मशाने मित्रबान्धवान् ।
नग्नश्च रिक्तहस्तश्च प्रयाति मूषितो यथा ॥

(आ) CRC 6.80, CRBh II 6.10, CPS 168.94.

(*a*) परिस्थाप्य CRC, CPS.

1447.

गृहेष्वर्था निवर्तन्ते श्मशानादपि बान्धवाः ।
शरीरं तीर्थमादाय पुण्यपापैः समं गतम् ॥

(आ) CNP II 149, CNG 221, CM 55.

(इ) Vet 23.7.

(ई) (Cf. Subh 86 ⌊IS 601⌋, ŚP 677).

(*a*) गृहे स्वर्थे नि° B in Vet; अर्त्तानि A in Vet.

(*b*) श्मशाने चैव Vet.

(*c*) काष्ठमादत्ते [ती°] Vet.

(*d*) पापपुण्यं सह व्रजेत् Vet; गता CNP II (MS).

1448.

गोजीर्णं वस्त्रजीर्णं च परपूर्वगताः स्त्रियः ।
दुर्जनं सततं मित्रं दूरतः परिवर्जयेत् ॥

(आ) CNF 15, CNPN 25 *cb/ad*, CM 72. (Cf. Nos. 29, 107, 109, 468, 502).

(*a*) °जीर्ण CNF (MS); Monseur corrects *a* to read गोजीनं वत्सजीनं च; E. Bartoli disagrees.

(*b*) भारिं (the MS has भारीं) जारभराः स्त्रि° CNPN.

(*c*) दुर्जनं शत्रुमित्रं च CNPN.

1449.

गोधूली धान्यधूलिश्च पुत्रस्याऽऽलिङ्गतो रजः ।
रजः स्त्रियाश्च कौन्तेय हन्ति पापं पुराकृतम् ॥

(आ) CNPN 28, CM 56.
(*b*) °लिङ्गनो CNPN (MS).
(*c*) स्त्रियं CNPN (MS).

1450.

गोपयेत् स्वानि रन्ध्राणि पररन्ध्राणि चिन्तयेत् ।
कुसीदे न निवर्तेत राज्यमिच्छन् नृपः स्थिरम् ॥

(आ) CRC 4.34, CRB 4.24, CPS 87.14.
(*a*) राष्ट्राणि CRB.
(*b*) परराष्ट्राणि CRB.

Cf. Crn. 145.

1451.

गोभिर्धनं किंचिद् धनं हैमं चार्धधनं स्मृतम् ।
धान्यं च धनमेव स्याद् विद्या भूमिरिवाक्षया ॥

(आ) CNP II 88, CM 57.
(*b*) हेमं CNP II, CM. (My change to हैमं)
(*d*) विद्या भूमी च चाक्षयं CNP II (MS).

1452.

गोशतादपि गोक्षीरं मानं धान्यशतादपि ।
मन्दिरे मञ्चकस्थानं कस्यार्थे बान्धवा हताः ॥

(आ) CNP II 48, CM 58.
(इ) *g* in Vet 15.10, (cf. Vet 15.10).
(*a*) गोगते प्रपि CNP II.
(*b*) मानं मपि शतामपि CNP II; मान मूढशतैरपि *g* in Vet.
(*c*) मंदिरं *g* in Vet.

Vet *ad* 15.10 (*a*) as above, (*b*) प्रस्थं कुम्भशतादपि, (*c*) प्रासादान् म° (but as above with °कस्थस्य *a* in Vet) and (*d*) शेषां परविभूतयः (but *b c e* in Vet

also as above). The reading of Vet is clearer. Identical with Vet is a quotation of Nilakaṇṭha (*ad* MBh 12.174.32).

1453.

गौरवं प्राप्यते दानान् न तु द्रव्यस्य संग्रहात् ।
आगच्छन् वाञ्छितो लोकैर् वारिदो न तु वारिधिः ॥

(आ) CNG 286.

(ई) *ab* also SRBh 69.7, JS 419.3, IS 2209, Subh 265 and *cd* also in Subh 134 and 291, IS 4346, JS 420.10.

(*b*) वित्तस्य संचयात् SRBh, JS; वित्तस्य [द्र°] JS.

(*c*) वाञ्छतैर् IS (Subh); वाञ्छयते JS.

घं

1454.

घृतं भूषणमन्नस्य यौवनं नरभूषणम् ।
धनस्य भूषणं दानं स्वामिनो भूषणं कृपा ॥

(आ) CNG 301. (Cf. Nos. 364, 523, 526, 1545, 1945, 2154).
(*c*) वाक्यस्य भूषणं सत्यं CNG v. l.

च

1455.

चण्डालश्च दरिद्रश्च द्वाविमौ तुलया धृतौ ।
एकः स्वबन्धुभिः स्पृष्टस् तैरपि त्यज्यतेऽपरः ॥

(आ) CRC 4.29, CRB 4.19, CRBh II 4.17, CPS 96.39.

(*b*) एतौ CRC; समौ [धृ°] CRBh II.

(*c*) स्पृश्यस् CRC.

(*d*) ऽपरैः CPS.

Cf. Crn. 64.

1456.

चन्दनादपि संभूतो दहत्येव हुताशनः ।
विशिष्टकुलजातोऽपि यः खलः खल एव सः ॥

(आ) CNP II 158.

(इ) PP 1.399, PM 1. 177.

(ई) IS 2241, Subh 89.

(*a*) संदनाद् [च°] *N* in PP.

(*c*) वसिष्ठः कु° CNP II (MS); वशिष्ट° *bh* in PP; वसिष्ट° *N* in PP.

(*d*) खलु खलु एव च CNP II (MS); खलः om. *P* in PP.

1457.

चन्द्रो भाति सुनिर्मलेऽथ गगने तारा विचित्रेऽम्बरे
हारो भाति च कामिनीकुचतटे पीनोन्नते यौवने ।
हंसो भाति सरोवरे सनलिने वैदूर्यवर्णोदके
राजा भाति सुमन्त्रिभिः परिवृतः श्रीधाम्नि सिंहासने ॥

(आ) CRC 8.131, CRBh I 8.131 (*bc* incomplete), CRBh II 8.78, CPS 325.23.

(*a*) °ले गतघने CRBh II; °ले गतघते CRBh I; °चित्रं वरे CRBh II; °चरे CRBh I.

(*b*) यौवनात् CRBh II.

(*c*) °नलिले CPS; वैदुर्य CRC, CRBh I, CPS.

(*d*) भातिच् म° CRBh II; चमन् म° CRBh I; परिवृत्ते CRBh I; श्रीयात्रि CRBh I.

Śārdūlavikrīḍita metre.

1458.

चर्मखण्डं द्विधा भिन्नम् अपानोद्गारवासितम् ।
तत्र मूढाः क्षयं यान्ति प्राणैरपि धनैरपि ॥

(आ) CNP II 166, CNT IV 165, CM 62.
(इ) (Cf. BhŚ 493).
(ई) (Cf. SRBh 371.123, SRK 250.83).

1459.

चलं वित्तं चलं चित्तं चलं जीवितमावयोः ।
प्रसारय करं विप्र धर्मस्य त्वरिता गतिः ॥

(आ) CnT V 91. (Cf. No. 1398).
(ई) SRK 250.84, SRHt 17.4, IS 2263, Subh 99.
(*a*) च° चि° च° वि° tr. Subh, SRK.
(*b*) चले SRK; जीवितयौवने SRK.
(*cd*) चलाचलमिदं सर्वं कीर्तिर्यस्य स जीवति SRK.
(*d*) दैवस्य कुटिला गतिः SRHt.

1460.

चापमानय सौमित्रे शरांश्चाशीविषोपमान् ।
क्रूरस्य चोग्रदण्डस्य लोकोऽयमनुवर्तते ॥

(आ) CRP 8 123, CRB 8.125, CRBh I 8.135.
(इ) (Cf. R 6.21, 22. ⌊*cd* different⌋).
(*b*) शाराश् CRBh I.
(*cd*) समुद्रं शोषयिष्यामि पद्भ्यां यान्तु प्लवङ्गमाः R.

1461.

चापलाद्वारयेद् दृष्टिं मिथ्यावाक्यं च वारयेत् ।
मानवे श्रोत्रिये चैव भृत्यवर्गे सदैव हि ॥

(आ) CRT 4.12.

(इ) GP 1.111. 28.

(*a*) The Tibetan text suggests according to S. Pathak: चापल्यमश्रयेत् यो वा.

(*b*) The Tibetan text suggests according to S. Pathak: तथैव च [न चा°]; चाब्रवीत् CRT (?).

(*d*) सुखायते CRT (?). My changes in *b* and *d*.

Cf. Crn. 85.

1462.

चिता चिन्ता द्वयोर्मध्ये चिन्ता एव गरीयसी ।
चिता दहति निर्जीवं चिन्ता दहति जीवितम् ॥

(आ) CNW 62, CNL 97.

(इ) Vet 3.119 and 11. 150.

(ई) ŚKDr *ad* निर्जीव ascribed to प्राञ्चस्, IS 2280. (Cf. IS 2281).

(*a*) समायुक्ता [द्व°] Vet 3; समाख्याता [द्व°] Vet 11.

(*b*) तेन चिताधिका [द्व°] Vet 11.

(*c*) जीवं [नि°] CNL (*contra metrum*).

(*d*) देहेचिन्ता साजीवनम् CNL; चापि सजीवकम् Vet 3; जीवेन संयुक्तम् Vet 11; चिन्दा (*sic !*) ŚKDr.

1463.

चित्रकृत् काव्यकर्ता च कुवैद्यः कुनरेश्वरः ।
चत्वारो नरकं यान्ति पञ्चमो ग्रामकूटकः ॥

(आ) CNI I 220.

(ई) IS 2287, Subh 135.

(*a*) °कः कः व्य° CNI I.

(*b*) च वैद्य कोज्योतिसुचकः CNI I.

(*d*) °कोटकः CNI I.

1464.

चिन्तया नश्यते रूपं चिन्तया नश्यते बलम् ।
चिन्तया नश्यते प्रज्ञा व्याधिर्भवति चिन्तया ॥

(आ) CvH 7.13.

(*a*) चिंतया CvH.

(*b*) चिंतया CvH; वलं CvH.
(*c*) चिंतया CvH.
(*d*) चिंतया CvH.

1465.

चिन्तासहस्रेषु च तेषु मध्ये
चिन्ताश्वतस्रोऽप्यसिधारतुल्याः ।
नीचापमानं क्षुधितं कलत्रं
भार्या विरक्ता सहजोपरोधः ॥

(इ) GP 1.115.19.
(*a*) चिन्तासहस्राणि बहूनि मध्याच् GPy.
(*c*) नीचापमानः GPy.

Indravajrā metre.

1466.

चैत्रे मासि गुडाहारा वह्वाहाराश्च कार्त्तिके ।
पौषे मासि जलाहारा भवन्ति तव शत्रवः ॥

(आ) CNPN 92, CM 63. (Cf. No. 1467).
(*b*) वङ्गा° CNPN (MS).

1467.

चैत्रे मासि निम्ब्राहारा लघ्वाहाराश्च कार्त्तिके ।
पौषे मासि यथाहारा भवन्ति तव मित्रकाः ॥

(आ) CNPN 93, CM 64. (Cf. No. 1466).
(*a*) निम्ब° CNPN (MS).

1468.

चौरो वा यदि चाण्डालः शत्रुर्वा पितृघातकः ।
अतिथिः कालसंप्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥

(आ) CNP II 53, CM 65.
(इ) (Cf. Parāśara in Aufrecht's Verzeichniss der Oxforder Handschriften 268 *a* 15 [*ad* IS 4362, Nachträge], PP 4.2-4, Pts 4.2-4, PtsK 4.2-4).
(*c*) काले सं° CNP II, CM.

छ

1469.

छिन्नोऽपि रोहति तरुः
  क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः
  संतप्यन्ते न विधुरेषु ॥

(आ) CVNS 10.21.

(इ) BhŚ 246, SRBh 47.93, SRK 19.80, IS 2314, Sskṛ 62

(*a*) छिन्नापि IS.

(*b*) चन्द्रः क्षीणोऽपि वर्धते लोके SRBh, SRK; चन्द्रोऽपि वर्धते लोके IS; अपचीयते F_2 in BhŚ; चंद्रः F_5 in BhŚ; शनैश्चंद्रः J in BhŚ; उपमुते लोके IS; लोके [पु° च°] $W_{3,4}$ in BhŚ.

(*c*) विमृषंतः C in BhŚ.

(*d*) संतप्येरन् B_1 in BhŚ; च विपदा F_2 in BhŚ; ते वि१दा (°दि W_1) C D $E_{0,1,3,5}$ I W_1 in BhŚ; विधुरेपि E_2H in BhŚ; सत्सु विदुरेषु J_1 in BhŚ; विधुरेषु सत्सु J_2 in BhŚ; विप्लता लोके CVNS; न ते विप्लुता लोके IS, w_{2-4}^{a} in BhŚ; विपदि लोकेषु Y_3 in BhŚ; विश्लथेषु लोकेषु $T_{1,2}$ in BhŚ; विधिरेषः Y_5 in BhŚ; न लकेस्मिन् SRBh,SRK; लोकेषु $Y_{4,6}$ in BhŚ.

Āryā metre.

ज

1470.

जनको गुरुरेव स्याद् गुरुश्चापि महागुरुः ।
गर्भधारणपोषाभ्यां जननी ह्यधिको गुरुः ॥

(आ) CPS 331.37.

1471.

जननी जनको भ्राता पुत्रो मित्रं तथैव च ।
न सन्ति वल्लभास्तस्य दारिका यस्य वल्लभा ॥

(आ) CNP II 114, CM 66. (Cf. No. 2023).
(इ) Vet 21.7. (Cf. BhŚ 197, Amitagati's Subhāṣitasaṁdoha 24.2, 4, 6, 13 and 14, Kṣemendra's Kalāvilasa 9.27, etc.).
(*b*) तनयस्तनया स्वसा Vet; मित्रस् CNP II (MS).
(*c*) नश्यन्ति वल्लभा तस्य CNP II (MS); नो [न] A in Vet; नस्यति B in Vet; नश्यंति *d* in Vet.
(*d*) दारकार्थस्य व° CNP II (MS); प्रमदा [दा°] *d* in Vet.

1472.

जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु ।
मोहयन्ति च संपत्तौ कथमर्थाः सुखावहाः ॥

(आ) CNB 114.
(इ) H (HJ 1.192, HS 1.172, HM 1.179, HK 1.184, HP 1.141, HN 1.142, HH 32.5-6, HC 43.8-9).
(ई) SRBh 64.8, IS 2327.
(उ) (Cf. SS ⌊OJ⌋ 468).

1473.

जनस्याशयमालोक्य यो यथा परितुष्यति ।
तं तथैवानुवर्तेत पराराधनपण्डितः ॥

(आ) CRC 2.9, CRB 2.21, CRCa I 2.19, CPS 34.26.

(*a*) आलक्ष्य CRB.
(*c*) वर्तेत CRCa I.

1474.

जपः स्नानं तपः स्नानं स्नानमिन्द्रियसंयमः ।
सर्वभूतदया स्नानं जलस्नानं च पञ्चमम् ॥

(आ) CNN 34.
(ई) (Cf. IS 2362, Subh 294).
(*b*) इन्द्रियसंयमम् CNN.

1475.

जये च लभते लक्ष्मीं मृते चापि सुराङ्गनाम् ।
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे ॥

(आ) CNP II 205.
(इ) H (HJ 2.172, HS 2.162, HM 2.172, HK 2.170, HH 69.15-6).
(ई) SRBh 147.220, IS 2344.
(*a*) जिते CNP II; वा [च] HS; लभ्यते लक्ष्मी CNP II.
(*b*) मृतेनापि Hit (°वापि HS); चैव CNP II; सुराङ्गना CNP II.
(*c*) क्षणविध्वंसिनी काया CNP II.

Cf. JSAIL 24.9.

1476.

जयो धरित्र्याः परमेव सारं
परं गृहं सद्मनि देवदेशः ।
तत्रापि शय्या शयते वरा स्त्री
रत्नोज्ज्वला राजसुखस्य सारम् ॥

(आ) CRC 8.81, CPS 246.73.

Upajāti metre (Upendravajrā and Indravajrā).

1477.

जरठं च तपस्वीं च शूरत्वमकृतव्रणम् ।
मद्यपं स्त्रीषु सक्तं च न श्रद्दध्यात्प्रयोजयेत् ॥

(आ) CNSap. 46.

1478.

जरा व्याधिश्च मृत्युश्च यदि न स्याादिदं त्रयम् ।
तदा संसारभोगेऽस्मिन् कामं राजतु मे मनः ॥

(आ) CRC 6.81, CPS 168.95.

1479.

जलमग्निं विषं शस्त्रं क्षुद्व्याधी पतनं गिरेः ।
निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते ॥

(आ) CNB 144.
(इ) H (HJ 1.176, HS 1.156, HM 1.160, HK 1.162, HP 1.124, HN 1.125, HH 30.3-4, HC 40.7-8).
(ई) SRBh 163.457, IS 2358.
(*a*) जलमणिविषं CNB; अग्निर् HJ.
(*b*) °व्याधीः HJ.
(*d*) प्राणान्विमुञ्चति IS.

1480.

जलरेखा खलप्रीतिर् अर्धवारिघटस्तथा ।
शिरसा धार्यमाणोऽपि खलः खलखलायते ॥

(आ) CNW 72, CnT V 81.
(ई) IS 2361, (cf. Subh 276).
(उ) (Cf. LN ⌊P⌋ 68, NKy ⌊B⌋ 98).
(*c*) धार्यमाने IS (CNW MS A); धार्यमानो IS (CNW MS B).

1481.

जानामि धर्मं न च मे प्रवृत्तिर्
जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि दैवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥

(आ) CRC 8.134, CRP 8.121, CRBh I 8.133, CPS 322.14.
(ई) (Cf. Medhātithi *ad* Mn 7.205).
(*a*) प्रवृत्ति CRBh I; प्रवृत्तिः CPS.
(*b*) जनामि CRP, CRBh I; °धंर्म CRBh I (scribe's error).

(*c*) देवेन CRC, CRP CRBh I, CPS.

(*d*) चराभि [क°] CRP.

Upajāti metre (Indravajrā and Upendravajrā).

1482.

जामाता कृष्णसर्पश्च पावको दुर्जनस्तथा ।
उपकारैर्न मन्यन्ते पञ्चमो भागिनेयकः ॥

(आ) CNI I 348 (repeated twice). (Cf. Nos. 183 and 184).

(ई) IS 2408, Subh 26.

(*a*) °सर्पस्क CNI I.

(*b*) दुर्जनः पावकस्तथा Subh.

(*c*) उपकारं CNI I; गृह्णन्ते Subh.

(*d*) भगिनीसुतः CNI I.

1484.

जीर्णे भोजनमात्रेयः कपिलः प्राणिनां दयाम् ।
बृहस्पतिरविश्वासं पाञ्चालः स्त्रीषु मार्दवम् ॥

(आ) CRB 8.45, CNI I 232.

(*b*) करोति [क°] CRB; दया CNI I.

(*c*) °विश्वासौ CNI I.

(*d*) पांचाल CNI I.

1485.

जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥

(आ) CNP II 253, CM 68.

(इ) *g* in Vet after 18.15.

(*a*) जीवितो वाक्यकारण्य CNP II; वाक्यकारणात् CNP.

(*b*) भूरिभोजन CNP II.

1486.

जीवन्तोऽपि मृताः पञ्च श्रूयन्ते किल भारते ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥

(आ) CNP II 120, CNI I 149, CNT IV 253, CNL 69 *cd/ab*, (CnT II 10. 6, CnT III 7.14, CnT V 30, CnT I 14, CnT VII 21. Cf. No. 91).

(इ) P (PP 1. 264, Pts 1. 266, PM 1. 103, PtsK 1. 298) Śts 26.3, Śto 322. 18-9.

(ई) ŚP 1375, SR 155. 123, SuM 7.12, SRK 108. 3, IS 2431.

(*a*) मृता CNI I.

(*b*) व्यासेन परिकीर्तितः PtsK, PP, Śto, ŚP, SRBh, SRK; त्रिभर्यातिमशी (*sic !*) CNL; श्रूयते CC_1, in Śts; ब्रूयंते L in Śts; श्रूयतां H in Śts; भारत Śts (CC_1, L O in Śts as above), SuM; भारतः CNP II; मारत CNI I.

(*c*) द्ररिद्री CNI I; दरिद्री CNL, CC_1, A in Śts; मूर्खः P in PP.

(*d*) परसेवकः IS; °सेवंकः CNI I; °सेवक IS.

1487.

जीवोऽपि राजा नगरं शरीरं
मन्त्री मनोलोक इवेन्द्रियाणि ।
मनोविनोश सकलं विनष्टं
यथा विकर्णं कटकं कुरूणाम् ॥

(आ) CvṢ 3.10, CvA 3.10, CvL I 3.10, CNŚK 72.

(*a*) शरीर CvA.

(*b*) मनोलाक CvA.

(*c*) मनावि° CvA.

(*d*) यथ CvL I; मथा CvA (*sic !*); कदकं CvA.

Upajāti metre (Indravajrā and Upendravajrā).

1488.

ज्ञातयः शत्रवश्चौरा आयं पश्यन्ति न व्ययम् ।
आयं व्ययं च मध्यस्था व्ययमेव सुहृज्जनाः ॥

(आ) CNF 85, CNPh 111, CNI II 74.

(ई) IS 6366, Kk 66.

(*a*) ज्ञातयेः CNF (MS); शत्रवो ज्ञातयश् Kk; शत्रुवश् CNF (MS); चैव CNI II, Kk; चैराः CNPh; चोरा CNF (MS), also E. Teza in GSAI I 45.

(*b*) अय CNF (MS); लाभं [आ°] Kk; पश्यन्ती CNF (MS).

(*c*) आयव्ययौ CNPh; मध्येस्येद् CNF (MS);......यक णे च मध्यं च CNI II.

(*d*) वयम् CNF (MS); एकं CNPh, CNI II; सुजना CNF (MS); °जनः CNI II.

1489.

ज्ञानं यत्र शिवं तत्र गावो यत्र ततः सुखम् ।
यत्र साधुस्ततो जीव्यं यथा भार्या तथा रतिः ॥

(आ) CNW 90, CNPh 70.
(ई) IS 2449.
(*a*) श्रिय [शि°] CNPh.
(*b*) यत्रै गावस् (tr.) CNPh.
(*c*) साधु CNW (साधुः CNW MSs AB); साधुस्भार्यस्ततोरति CNPh.
(*d*) यतो [य°] CNPh; स्थितो [र°] CNW, CNPh, IS.

1490.

ज्ञानवान् ज्ञानदानेन निर्भयोऽभयदानतः ।
अन्नदानात्सुखी नित्यं निर्व्याधिर्भेषजाद्भवेत् ॥

(आ) CNG 217.
(ई) IS 2455, Subh 30.
(*a*) ज्ञानं विज्ञा° CNG; ज्ञानवान° Subh.
(*b*) भयदानतः [°ऽभ°] Subh.

1491.

ज्ञानवृद्धा वयोवृद्धा ये च वृद्धा बहुश्रुताः ।
ते सर्वे धनवृद्धस्य द्वारि तिष्ठन्ति किंकराः ॥

(आ) CNI I 66.
(इ) Skanda-purāṇa, Māheśvarakhaṇḍa, Kaumārakhaṇḍa 2. 11.
(*a*) °वृद्धस्तयो° CNI I.
(*c*) सर्वे ते CNI I.
(*d*) द्वारे CNI I; °करः CNI I.

1492.

ज्येष्ठः पितृसमो भ्राता मृते पितरि शौनक ।
सर्वेषां स पिता हि स्यात् सर्वेषामनुपालकः ॥

(इ) GP 1. 114. 64.

त

1493.

तत्र मुक्तादरस्नेहो विलुप्तं यत्र सौहृदम् ।
तदेव केवलं श्लाघ्यं यस्यात्मा क्रियते स्तुतौ ॥

(इ) GP 1.115.56.
(*a*) यत्र [त°] GPy.
(*b*) तत्र [य°] GPy.
(*d*) यत्रत्मा GPy.

1494.

तन्न भवति यद्भाव्यं
भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि नश्यति
यस्य तु भवितव्यता नास्ति ॥

(आ) CNL 91 (corrupt). (Cf. No. 1753).
(इ) (Cf. P [PP 2. 8 and 134, Pts 2. 9 and 122; 2. 103 and 107, PtsK 2. 11 and 133, 113 and 117]), VCsr VII 13 and 12. 4, BhŚ 569).
(ई) IS 2487, Subh 190. (Cf. SuM 8.25). This thought is very often repeated in Sanskrit literature e.g. see IS 2354, 3519, 3595, 4562, 5181).
(*a*) यत्त भाव्यं Subh.
(*b*) भवन्ति Subh; विना (°पि om.) CNL.
(*c*) °तपि (°म° om.) CNL.
(*d*) यद्यपि [य° तु] Subh; च [तु] CNL; प्राकृतं [भ°] CNL.

Āryā metre. (In CNL defective).

1495.

तस्माद् भूमीश्वरः प्राज्ञं धर्मकामार्थसाधने ।
नियोजयेद्धि सततं श्रमणब्राह्मणहिते ॥

(आ) CRT 5.26. (Cf. Nos. 341,414,631,659,699,1435).

(इ) GP 1.112,25.

(*d*) गोब्राह्मणहिताय च GP.

1496.

ताम्बूलहरिता वक्त्रा दन्तधावनवर्जिताः ।
सर्वे मन्त्राः पलायन्ते सिंहाद् वनचरा यथा ॥

(आ) CRBh II 7.62. (Cf. Nos. 416 and 1353).

1497.

ताम्बूलेन विना राजन् जडीभूता सरस्वती ।
मुखान्न निश्चरेद्वाणी गृहात् कुलवधूरिव ॥

(आ) CNPN 59, CM 69. (Cf. No. 2159).

(*b*) सरश्वती CNPN (MS).

1498.

ताम्रपात्रे पयःपानम् उच्छिष्टे घृतभोजनम् ।
दुग्धं च लवणं दत्त्वा सद्यो गोमांसभक्षणम् ॥

(आ) CNF 63.

(*a*) °पात्र CNF (MS); पयपानं CNF (MS).

(*b*) ऊच्छिष्टेघतभोजन CNF (MS). उच्छिष्टघृ° CNF.

(*c*) दुग्धे CNF (MS); देधा CNF (MS); दधि [द°] CNF.

(*d*) गोमांसं सद्यो भ° CNF; तसदोगौमासभक्षण CNF (MS).

1499.

तावद्गर्जति मातङ्गो वने मदभरालसः ।
शिरोविलग्नलाङ्गूलो यावन्नायाति केसरी ॥

(आ) CNI I 291, CnT II 28.9, CnT VII 70.

(ई) SV 588, SRHt 121.20, IS 2547, Subh 113.

(*b*) वने भक्षणलालसाः CNI I; वने पङ्कजलालसः Subh; पदजनानसः Subh (MS); मदकळासः SRHt.

(*c*) मस्तकेचलला° CNI I; शिरोऽवननतलाङ्गूलो Subh; शिरोवल. लाङ्गूलो SRHt.

1500.

तावद्गुणा गुरुत्वं च यावन्नार्थयते परम् ।
अर्थी चेत्पुरुषो जातः क्व गुणाः क्व च गौरवम् ॥

(आ) CNI I 71.
(ई) SV 3252, SRBh 76.26, IS 2548, Subh 70, SuM 7.22, SuB 14.6.
(*b*) क्वचित् CNI I; परान् SuB.
(*c*) अथविपु° CNI I; अर्थित्वे वर्तमानस्य SV, SRBh.
(*d*) न गुणा न च गौ° SV, SRBh.

1501.

तावन् महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज् ज्वलति नाङ्गेषु हतः पञ्चेषु पावकः ॥

(आ) CVNS 15.22.
(इ) BhŚ 251.
(ई) SRBh 166.594, IS 2553, Śatakāvali 70.
(*a*) महित्वं IS; पांडि° CVNS; °त्वं IS.
(*b*) कु° वि° tr. CVNS; कुलीनताः IS; विवेकित्वं CVNS; विवेकत IS.
(*c*) नांगेषु CVNS.
(*d*) हंतः CVNS; हन्त IS; हूत IS; स्वतः [हृ°] SRBh; पंचे° CVNS. (For other variants in BhŚ see BhŚ 251).

This maxim was probably incorporated in the CVNS text from BhŚ.

1502.

तिर्यक्तां व्रजतु प्रतारयतु वा धर्मक्रियाकोविदं
हन्तु स्वां जननीं पिबत्वपि सुरां शुद्धां वधूमुज्झतु ।
वेदान्निन्दतु वा हिनस्तु जनतां किं वानया चिन्तया ।
लक्ष्मीर्यस्य गृहे स एव भजति प्रायो जगद्वन्द्यताम् ॥

(आ) CRB 4.16 (*cd* corrupt).
(ई) SRBh 63.35.
(*a*) तिर्यक्तां CRB; भजतु [व्र°] SRBh.
(*c*) निन्तया SRBh, CRB.

Śārdūlavikrīḍita metre.

1503.

तिलार्धं स्वीयभागश्च निःसारं बदरीफलम् ।
आहारः परतः श्रेयो धूलिः परगृहादपि ॥

(आ) CNW 66.
(ई) SRBh 394.689, IS 2561.
(*a*) स्वीयभागं च CNW.
(*c*) आहारात् SRBh.

1504.

तेजस्विनि क्षमोपेते नातिकार्कश्यमाचरेत् ।
अतिनिर्मथनादग्निश् चन्दनादपि जायते ॥

(आ) CNPh 157.
(ई) ŚP 1399, SV 2655, SRBh 79.9.
(*a*) °स्विनी गुणोपेतो CNPh.
(*b*) नास्ति° CNPh.
(*c*) अतिनिर्मन्थ° SRBh; °नाद्वह्निश् SV.

1505.

तैलाद्रक्षेज्जलाद् रक्षेद् रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यम् एवं वदति पुस्तकम् ॥

(आ) CLT closing stanza.

1506.

त्यजन्ति शूर्पवद्दोषान् गुणान् गृह्णन्ति साधवः ।
दोषग्राही गुणान् त्यक्त्वा ह्यसाधुस्तित——उर्यथा ॥

(आ) CNW 108, CNI I 326. (Corrupt) (cf. No. 2147).
(ई) ŚKDr *ad* दोषग्राही (ascribed to Udhaṭa), Kk 24, IS 6235, Subh 203.
(*a*) विसृज्य ŚKDr; सूर्पवद् ŚKDr, CNW MSs AB; गुणाः गृह्णन्ति सूपश्चा Subh; शूर्पवनुच्यते दोषा CNI I.
(*b*) गुणाः Subh; गुणाग्रात्यायश्च पण्डितैः (*sic !*) CNI I.
(*c*) गुणत्यागी (°त्या°) SKDr, CNI I.

(*d*) चालनीव हि दुर्जनः (दुरासदः, Kk) SKDr, Kk; निर्गुरीरखदुर्ज्जनः (*sic !*) CNI I; चालनी इव Subh.

1507.

त्यज पुत्र लघोः सङ्गं भज साधुसमागमम् ।
श्रूयतां शिशुनागेन भेकेन निहतः फणी ॥

(आ) CNW 68. (Cf. No. 428).
(ई) IS 2623.

1508.

त्यजेद् बन्ध्यामष्टमेऽब्दे नवमे तु मृतप्रजाम् ।
एकादशे स्त्रीजननीं सद्यश्चाप्रियवादिनीम् ॥

(इ) GP. 1.115.64.

1509.

त्यजेन् मालासमं मित्रं त्यजेन् मित्रं तुलासमम् ।
त्यजेन् मेरुसमं मित्रं ग्राह्यं मित्रं महीसमम् ॥

(आ) CRT 8.58, CRC 7.5, CnT II 29.4, CnT VII 78, CPS 178.7. (Variant of No. 1345).

1510.

त्रिभिर्वर्षैस्त्रिभिर्मासैस् त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैर् इहैव फलमश्नुते ॥

(आ) CnT II 12.3, CnT III 7.37, CnT V 63.
(इ) H (HJ 1.85, HS 1.78, HM 1.82, HP 1.60, HN 1.61, HK 1.84, HH 19. 17-8, HC 26.16-7), PrC 4.211.
(ई) ŚP 700, IS 2642.
(*c*) अत्युग्रपुण्य HP, PrC, ŚP; अत्युत्कटैः पुण्य पापैः N in HP; पापानाम् HP, PrC, ŚP.
(*d*) उच्यते Pp in HS.
Cf. JSAIL 24.53.

1511.

त्रिविधाः पुरुषा राजन् उत्तमाधममध्यमाः ।
नियोजयेद्यथावत्तांस् त्रिविधेष्वेव कर्मसु ॥

(आ) CRT 5.11. (Variant of No. 743).

(इ) MBh (MBh ⌊Bh⌋ 5.33.56, MBh ⌊R⌋ 5.32.67, MBh ⌊C⌋ 5.1033), H (HJ 2.69, HS 2.69, HM 2.70, HK 2.70, HP 2.63, HN 2.62, HH 50. 14-5, HC 66.8-9). (Cf. GP 1.112.11; R 6.6.6).

(ई) ŚP 1366, SRBh 146. 155. SRHt 143 3, (attributed to K), IS 2646, Kṛtyakalpataru, Rājadharmakhaṇḍa 101. 7-8.

(*a*) भृत्या बहुविधा ज्ञेया GP; °पुरुष MBh (var.); राजन् MBh (C).

(*b*) °व्यम: IS.

(*c*) नियोक्तव्या यथार्हेषु GP; °येत् तथैवैतां(स्) Hit, SRBh; यथत्रंत् तांस् SRHt; यथात्रृत्तं MBh (var.).

This maxim was probably incorporated in the CRT text from MBh.

Cf. JSAIL 30.135.

1512.

त्वमेव चातकाधारो ऽसीति केषां न गोचरः ।
किमम्भोदवरास्माकं कार्पण्योक्तिः प्रतीक्ष्यते ॥

(आ) CVNS 15.19.

(इ) BhŚ 521.

(ई) Pad 105.80, ŚP 782, SRBh 211.5, SRK 172.4, RJ 236, IS 2661.

(*a*) °धार Pad, ŚP, SRBh, SRK.

(*b*) इति [ऽसी°] Pad, ŚP, SRBh, SRK; ऽसिति IS.

(*c*) धिगम्भोद यदस्यापि (°धर तस्या° Pad, SRBh; °धिं यस्या° IS) Pad, ŚP, SRBh, IS; °वदरेस्माकं का° IS.

(*d*) °योक्ती: (°क्त: IS; °क्ति CVNS, Pad, SRBh, SRK) Pad, ŚP, CVNS, SRBh, SRK, IS; प्रतीक्षसे (°क्ष्यसे CVNS, W_3 in BhŚ; °क्षित: W_2 in BhŚ) Pad, ŚP, SRBh, SRK, CVNS, $W_{1,2,3}$ in BhŚ.

This maxim was probably incorporated in the CVNS text from BhŚ.

द्

1513.

दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम् ।
छिन्नं छिन्नं पुनरपि पुनः स्वादुदं चेक्षुदण्डं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥

(आ) CNP II 22.
(इ) Vet 15.18 *bc/ad*. (Cf. Mahān 252).
(ई) SRBh 51.229 *bc/ad*, Subh 208 *ca/bd*, SRK 15.41 *ca/bd*, IS 2219. (Cf. SRBh 386.362).
(उ) Śīt (OJ) 75.
(*a*) कान्तिवर्णं Subh (MS), CNP II.
(*b*) चन्दनश्चारुगन्धिः Subh (MS); °गन्धि Subh (IS).
(*c*) स्वादु चैवेऽक्षु° Vet, SRBh; चैवेक्षुकाण्डं SRK.
(*d*) न प्रा° (ऽपि om.) SRK, SRBh; नोभमानं Subh (MS); चोत्तमानाम् SRK, SRBh.

Mandākrāntā metre.

1514.

दण्डेन न तु मानेन सर्वमेतद्विधीयते ।
गर्दभादि दुन्दुभिश्च दासी बालाः स्त्रियस्तथा ॥

(आ) CNG 307.

1515.

दत्तान्यनेकदानानि रत्नानि विविधानि च ।
सुवाक्यं न हि संप्रोक्तं तेनाहं शूकरीमुखम् ॥

(आ) CNN 72[1].

1. This verse is not a maxim.

1516.

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥

(आ) CvL I 8.34, CNI I 135, CNG 294, CNT IV 234.

(इ) P (PP 2.39 and 4.11, Pts 2.45 and 4.12, PtsK 2.49 and 4.13, PD 305.80, PM 2. 10), VCsr 3.9 and 19.2, VCjr 19.2, Vet 1.21, Śts 28.3.

(ई) SRBh 160.306, SRHt 108.2, SuM 23.46, IS 2703, Subh 153 and 254.

(*a*) दादाति IS.

(*b*) कार्यम् [गु°] E in VCsr 3.9, SRHt; आख्यति पच्छसि IS; आख्याय कथ्यते SuM; जल्पति [पृ°] CvL I, CC_1 in Śts; वक्ति च [पृ°] A in PP 2.39, VCjr; भाषितं [पृ°] G in VCjr.

(*c*) भुनक्ति (भुङ्क्ते CC_1 in Śts) भुञ्जापयति (च) A in Vet, CC_1 in Śts; भुक्त CvL I; भोजयति Śts; भुञ्जयते G in VCjr; भुञ्जापयेत्येन O in VCjr; नित्यं [चै°] G in VCjr; गेहे [चै°] c in Vet.

(*d*) षड्भि (°धं om.) CvL I; षड्गुणं J in VCsr 3.9; षड्विधि (°धि V in VCsr 19.2; °धिः C in Śts) C_1 in Śts, SRBh, E in VCsr 19.2, V in VCsr 19.2, C in Śts; मित्रल° VCsr 3.9 (VJ as above), PD; बन्धुल° T in VCsr 3.9 and 19.2 SRHt; लक्षण CNI.

1517.

दन्तभङ्गो हि नागानां श्लाघ्यो यद्वन् महारणे ।
सतां धनक्षयस्तद्वद् विद्वद्दारिद्र्यवारणे ॥

(आ) CvṢ 7.11, CvA 7.11, CvL I 7.11. (Cf. Nos. 1775 and 1779).

(*a*) दंतभंगो CvṢ, CvA, CvL I.

(*c*) सभांधन CvL I; °क्षयंस्तद्व° CvṢ.

(*d*) °द्दारिद्र्यवाणे CvA (corrupt).

1518.

दरिद्रः कृपणो रोगी प्रवासी परसेवकः ।
भिक्षुकः कामुकश्चैव षडेते दुःखभागिनः ॥

(आ) CNF 89.

1519.

दरिद्रस्य मनुष्यस्य प्राज्ञस्य मधुरस्य च ।
काले श्रुत्वा हितं वाक्यं न कश्चित् प्रतिपद्यते ॥

(आ) CRT 6.15. (Cf. No. 439).

(इ) GP 1.113.42, PT 2.55.

(*c*) कालेऽप्युक्तं PT.

1520.

दरिद्रे दीयते दानं समृद्धानां कदाचन ।
व्याधितस्यौषधं पथ्यं व्याधितस्य च नौषधम् ॥

(आ) CNP II 262, CNM 170, CNMN 136, CNT IV 203, CM 71. (Cf. Nos. 1521 and 1774).

(*ab*) E. Monseur suggests that it would be better if the text would read समृद्धे दीयते दानं दरिद्रे न कदाचन, however *a* appears also in CNG 288.

(*a*) दरिद्री CNM.

(*b*) न समृधे क° CNM.

(*c*) °तस्योपधं मित्रं CNM; पश्यंन् CNP II (MS).

(*d*) निदुजस्य किमोषधम् (?) CNM; चानौ° CNP II (MS).

1521.

दरिद्रे दीयते दानं सर्वदा तत् प्रशस्यते ।
अदरिद्रे तु यद्दत्तं किं वारिदेन वारिधेः ॥

(आ) CNG 289. (Cf. Nos. 1520 and 1774).

1522.

दर्शने हरति चित्तं स्पर्शने हरते बलम् ।
संगमे हरते वीर्यं नारी प्रत्यक्षराक्षसी ॥

(आ) CNP II 179, CNT IV 168, CNM 163, CNMN 129.

(ई) IS 2719, Subh 185 and 293.

(*a*) दर्शनात् CNM; दर्शना हरते CNP II (MS); प्राणान् [चि°[Subh; चित्त CNM,

(*c*) मैथने [सं°] Subh; संगमैर् CNM; संभोगात् CNP II (MS); वीर्य CNM; काया [वी°] Subh (with मैथुनें).

1523.

दश कामसमुत्थानि तथाष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥

(आ) CVNS 16.23.

(इ) Mn 7.45. (Cf. KN 1.39-68; 11.12; 14.65, Śukranīti-śāra 1.215.238, MP in PDhS, Matsya-purāṇa in VīrR 146-9, Vi 3.50-2).

(ई) PDhS 1.1; 473.1, RRK 6.12-3, KṛKR 143.11-2, Vīr R 149.9-10.

(*a*) °समुच्छ्राणि RRK.

(*b*) तैथाष्टा CVNS; तु [च] Medhātithi's commentary.

(*c*) मृगयाक्षा (°क्षो) दिवा स्वप्नः PDhS; दुरंतानि CVNS.

(*d*) परिवादः स्त्रियो मदः (दमः) PDhS.

This maxim was probably incorporated in CVNS text from Mn.

Cf. JSAIL 27.21.

1524.

दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥

(आ) CNI I 305.

(इ) Mn 4.85, Padma-purāṇa, Sṛṣṭikhaṇḍa 19. 236, Bhaviṣya-purāṇa., Uttaraparvan 19.

(ई) (Cf. ŚP 2086, SRBh 145.114).

(*a*) °समश्चक्री CNI I, PdP, Bhav-pur.

(*b*) दशचक्री CNI I, PdP, Bhav-pur.

(*cd*) Some Mn texts have instead of वेश्या—वेशो and °वेश°. See L. Sternbach : Two readings of Mn 4.85 (Bhāratīya Vidya XVIII. Nos. 3-4, pp. 64-8).

This maxim was probably included in the CNI I text from the Padma-purāṇa or the Bhaviṣya-purāṇa and was borrowed from Mn.

Cf. JSAIL 27.13.

1525.

दाता दरिद्रः कृपणो धनाढ्यः
पापी शतायुः सुजनो गतायुः ।
कुलेषु दास्यमकुलेषु राज्यं
कलौ युगे षड्गुणमामनन्ति ।

(आ) CRP 8.138, CRB 8.140, CRBh I 8.149.
(ई) IS 2743 *ab*, Subh 88 *ab*.
(*a*) दरिद्रो IS.
(*b*) चिरायुः Subh; सुकृति Subh.
(*c*) राजकुलीनः सुकुलश्च दासः Subh.
(*d*) पश्यन्तु लोकाः कलिकेलितानि Subh; युगो CRBh I.

Upajāti metre (Indravajrā and Upendravajrā).

1526.

दानं पूजा तपश्चैव तीर्थसेवा श्रुतं तथा ।
सर्वं तद्विफलं तस्य यस्य चित्तं न शुध्यति ॥

(आ) CNG 249.
(इ) Vet 18.18.
(ई) IS 2754, Subh 96.
(*b*) शुतं Subh.

1527.

दानादिधर्मः क्रियते धनेन
धनेन धन्या धनिनो भवन्ति ।
धनं विना कामकथैव नास्ति
त्रिवर्गमूलं धनमेव नान्यत् ॥

(आ) CRC 4. 21. CPS 94. 33.
(*a*) दानादिधर्भः CPS.

Upendravajrā metre (Indravajrā and Upendravajrā).

1528.

दानेन तुल्यं धनमस्ति किंचित्
सन्तोषतुल्यं सुखमस्ति किं वा ।
विभूषणं शीलसमं कुतोऽस्ति
लाभोऽस्ति चारोग्यसमः पृथिव्याम् ॥

(आ) CRBh II 8.79.
(*a*) दाने° (°न on the margin).
(*b*) सुख° (°मस्ति on the margin).

Upajāti metre (Indravajrā and Upendravajrā).

1529.

दानेन भूतानि वशीभवन्ति
दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानात्
दानं हि सर्वव्यसनानि हन्ति ॥

(आ) CNI I 211.
(ई) (Cf. IS 2766, Subh 85).

Upajāti metre (Indravajrā and Upendravajrā).

1530.

दारिद्र्यं यौवने यस्य शिशुत्वे मातृशून्यता ।
वार्द्धक्ये पुत्रहीनत्वं निष्फलं तस्य जीवनम् ॥

(आ) CNW 49.
(ई) IS 2774, Kk 6.
(*a*) काले [य°] CNW.
(*b*) शैशवे मातृहीनता Kk.
(*d*) निःफलं IS (CNW MSs AB); जीवितं त° नि° tr. Kk.

1531.

दारिद्र्येणाभिभूतस्य पञ्च नश्यन्ति देहिनः ।
लज्जा शौचं तथाचारः सत्यं धर्मस्तु पञ्चमः ॥

(आ) CNPh 78, CNI II 73.

(इ) *ad* HJ I.135.

(*a*) दारिद्येणा° CNPh; दारिद्रेणा *ad* HJ.

(*b*) नश्यति CNPh, CNI II.

(*c*) CNI II illegible; has only लज्जा......(सदा [?]) चार: .

(*d*) धर्मश्च *ad* HS.

1532.

दिव्यं चूतफलं प्राप्य वहेद् गर्वं न कोकिलः ।
पीत्वा कर्दमपानीयं भेको भकभकायते ॥

(आ) CNPN 46, CNL 43, CNI II 66, CNF 19.

(इ) Vararuci's Nitiratna 9, (KSH 503).

(ई) SRBh 235.158, SRK 218.24, IS 2808, Subh 187. Each text is different, therefore it is difficult to reconstruct it.

(*a*) नानाद्रव्य फलं भुक्त्वा CNF; दिव्य CNPN; दिव्यः पुष्परसं Subh; च्युत° CNF (B MS); श्युत° CNI II; चूतरसं CNPN, Nitiratna, SRBh; पीत्वा [प्रा°] Nitiratna, SRBh.

(*b*) गर्ववं नायाति (Teza नायान्ति GSAI 1.44) कोकिलः (°लाः Subh, Teza GSAI 1.44); न गर्वि कोकिलो भवेत् CNPN; न गर्वं (tr. SRBh) याति को° Nitiratna, SRBh.

(*c*) पीत्वो CNI II; °पाणीयं Nitiratna.

(*d*) भेकः कर्कलायते (°लोपते CNF A MS) CNF (Teza कर्कतं लुम्पति GSAI 1.44); रटरटायते SRBh; मकमकायते CNL, CNI II, CNPN.

1533.

दुःखं परं बालकचेष्टितं च
मध्यं हि चान्तं जरया निरस्तम् ।
एतानि दुःखानि बहूनि लोके
चित्राणि संस्मृत्य न किंचिदिष्टम् ।

(आ) CRC 6.67, CPS 154.56.

Indravajrā metre.

1534.

दुःशीलोऽपि द्विजः पूज्यो न तु शूद्रो जितेन्द्रियः ।
कः परित्यज्य गां दुष्टां दुह्याच्छीलवतीं खरीम् ॥

(आ) CRC 3.48, CPS 64.38.

1535.

दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति ।
प्रसन्नं जलमित्याहुः कर्दमैः कलुषीकृतम् ॥

(आ) CRT 8.27.
(इ) GP 1.115.49.
(*c*) प्रसन्नमपि पानीयं GP.

1536.

दुर्जनाः शिल्पिनो दासा दुष्टाश्च पटहाः स्त्रियः ।
ताडिता मार्दवं यान्ति न ते सत्कारभाजनम् ॥

(आ) CPS 373.3.
(इ) GP 1.109.31.

1537.

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥

(आ) CNB 119.
(इ) H (HJ 1.82, MS 1.74, HM 1.79, HK 1.81, HH 18.26-7, HC 25.16-7).
(ई) SRK 26.47, SRBh 55.48, IS 2859, Kk 84. (Cf. SRHt 43.41).
(उ) Cf. DhN (P) 123, Vyās (C) 21 (identical with SRHt).
(*d*) कृष्णायति IS.

Cf. L. Sternbach, on the Sanskrit *Nīti* Literature of Ceylon; 1. Vyāsakāraya.

1538.

दुर्जनैरुच्यमानानि संमतानि प्रियाण्यपि ।
अकालकुसुमानीव भयं संजनयन्ति च ॥

(आ) CNN 13.

(इ) H (HJ 3.25, HS 3.23, HM 3.23, HP 3.24, HN 3.24, HK 3.24, HH 78.4-5, HC 103.8-9).
(ई) SRBh 55.41, IS 2860.
(उ) SS (OJ) 339.
(*b*) सस्मितानि [सं] Hit (with the exception of HM, I in HK, L in HS); सम्मितानि N in HP, Pp in HS; सम्मतान्य A in HP; वचांसि मधुरण्यपि SRBh.
(*d*) हि [च] HM, HK, SRBh; मे [च] HJ, HS, HP, HN, HH, HC.
Cf. JSAIL 24.65.

1539.

दुर्बलानामनाथानां बालवृद्धतपस्विनाम् ।
अन्यायपरिभूतानां सर्वेषां पार्थिवो गतिः ॥

(आ) CNP II 200, CNI I 278 v. l., CNT IV 237. (Cf. Nos. 52 and 475).
(इ) Oa in VCbr after 30.0.20 (p. 338a), e in Vet after 3.37 (p. 123) and *d* in Vet, after 14.14 (v. 162).
(ई) IS 2868, Subh 102. (Cf. CS 1.82).
(*c*) °परैस्तु परि° VCbr.
(*d*) पार्थिवा गुरु CNI I.
Cf. Crn. 39.

1540.

दुर्लभौ विष्णुपादौ च गङ्गास्नानं च दुर्लभम् ।
दुर्लभा विप्रगोष्ठी च दुर्लभा भारती कथा ॥

(आ) CNP II 95, CNI I 312, CM 73.
(*a*) विस्नु° CNI I.
(*b*) च om. CNI I.
(*c*) °गोष्ठी CNP II (MS); °गोष्टि CNI I; स्याद् [च] (?) CNI I.

1541.

दुष्टस्य दण्डः सुजनस्य पूजा
न्यायेन कोशस्य विवर्धनं च ।
अपक्षपातोऽर्थिषु राज्यरक्षा
पञ्चैव यज्ञाः कथिता नृपाणाम् ॥

(आ) CNG 287.

(इ) VCsr 8.2, Vet 23.37*ab* (p.123).

(ई) IS 2890, Subh 31.

(उ) RN (P) 89. (Cf. DhN ⌊P⌋ 263, SN ⌊P⌋ 62).

(*b*) संप्रवृद्धिः [वि°] VCsr, Vet.

(*c*) सुपक्ष° [अ°] TE in VCsr; संपक्षपार्थौ Q in VCsr; विषयेषु [ऽथि°] Subh.

(*d*) धर्माः [य°] Subh; कथितं J Q in VCsr.

Upajāti metre (Indravajrā and Upendravajrā).

Cf. Crn. 9.

1542.

दुष्टानां संगमं प्राज्ञो दूरतः परिवर्जयेत् ।
शीलं सात्यमनस्यं च पाण्डित्यं मित्रसंगमः ॥

(आ) CNPh 167.

(*a*) दुष्टानासं twice CNPh.

(*c*) सत्यमनास्यं CNPr.

(*d*) पाडित्यं CNPh.

1543.

दूरस्थानीव मित्राणि निःस्नेहा इव बान्धवाः ।
कान्ता चालेख्यरूपेव यः काले नोपतिष्ठति ॥

(आ) CSB I 2.58. (see No. 481).

(ई) IS 7549.

(*b*) निस्नेहानि CSB I.

1544.

दूर्वाया भूषणं पत्रं वृक्षाणां भूषणं सुमम् ।
स्ववृत्तिर्भूषणं पुंसां नारीणां भूषणं पतिः ॥

(आ) CNW 24. (Cf. Nos. 364,523,526,1454,1945,2154).

(ई) SRBh 387.418, IS 2921. (Cf. Sudarśana 9).

(*a*) पत्त्रं IS.

(*b*) पुष्पभूषणम् [भू° सु°] IS.

1545.

दृष्ट्वा बालकचेष्टा
यौवनदर्पोऽथ वृद्धवैराग्यम् ।
सापि गता सोऽपि गतस्
तदपि गतं स्वप्नमायेयम् ॥

(आ) CRC 6.68, CPS 153.53.

Āryā metre.

1546.

देवतातिथिभृत्यानां पितृणामात्मनश्च यः ।
न निर्वपति पञ्चानां उच्छ्वसन्न स जीवति ॥

(आ) CVNS 14.16.

(इ) Mn 3.72 (in some editions 3.62 or omitted).

This maxim was probably incorporated in CVNS from Mn.

1547.

देवताराधने दाने विद्याभ्यासे सदौषधे ।
क्षुत्क्षमायां भोजने च कर्तव्यं हितकाङ्क्षणम् ॥

(आ) CNP II 272, CnT II 24.10, CnT VII 2, CM 76.

(*a*) क्षुत्क्षमायां च मोयच्चः CNP II (MS).

(*d*) °व्या CNP II (MS); °णः CNP II (MS).

1548.

देवद्रव्येण या वृद्धिर् गुरुद्रव्येण यत्सुखम् ।
तद्धनं कुलनाशाय मृतोऽपि नरकं व्रजेत् ॥

(आ) CNG 268. (Cf. No. 491).

(ई) IS 2941, Subh 121 and 197.

(*b*) यद्धनम् IS (Subh).

(*d*) तत्सुखं नरकं नयेत् (व्रजेत्) IS (Subh).

1549.

देवब्राह्मणभक्ता च नित्यं धर्मानुषङ्गिणी ।
यस्य भार्या मुदा नित्यं देवेन्द्रोऽसौ न मानुषः ॥

(आ) CRC 1. 35, CPS 13.35. (Cf. Nos. 374,830,1035,1296,1752)

(*d*) महीतले [न मा°] CPS.

1550.

देवो राजा गुरुर्भार्या वैद्यनक्षत्रपाठकाः ।
रिक्तहस्ता न गच्छन्ति गते कार्यं न सिध्यति ॥

(आ) CNW 88, CNPN 68. (Cf. No. 1885).

(इ) (Cf. Vet, Intr 10, PT *ad* 152.1).

(ई) SRBh 387.411, IS 2957.

(*b*) वैद्यो नक्षत्रपाठकः CNPN.

(*c*) Pt. Durga Prasāda (JBBRAS 16 of 1885, p. 368) suggests : रिक्तहस्तैर्न गम्यन्ते; tradition does not bear him out; रिक्तहस्ते न गन्तव्यं CNPN; गच्छति CNW.

(*d*) तत्र कार्यं न सिद्ध्यते CNPN; सिध्यते IS (CNW MS A).

1551.

देशं त्यजेद् वृत्तिहीनं सवृत्तिकं समाविशेत् ।
त्यजेत् कृपणभूपालं शत्रुं सामान्यतस्त्यजेत् ॥

(आ) CRC 2.13, CPS 42.45.

1552.

देशे देशे लभेद् भार्यां पुत्रस्तत्रैव जायते ।
तं देशं नैव जानामि यत्र भ्राता सहोदरः ॥

(आ) CRBh II 8.97.

(इ) (Cf. BhŚ 534).

(ई) SRBh 361.6, Sāhityamīmāṁsā 6 (p. 72), SRHt 94. 1, NT 65, IS 7553.

1553.

दैवं पुरुषकारश्च द्वावेतौ पुरुषार्थकौ ।
पूर्वजन्मकृतं कर्म तद्दैवमिह कथ्यते ॥

(आ) CPS 380.23.

1554.

दैवज्ञः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥

(आ) CRC 3.23. (Cf. No. 507,625,1662).

1555.

दोषकारी विहन्तव्यो गृहजातोपि मूषकः ।
उपप्रदानैर्हितकृन् मार्जारः प्राप्यते गृहे ॥

(आ) CRB 7.59, CRP 7.58, CRBh I 7.57. (Cf. No. 1556).
(*a*) विहन्तव्यो CRBh I; विहर्तव्यो CRB, CRBh, CRP.
(*c*) तपः प्र° CRBh I; त्यपः प्र° CRP.
(*d*) प्रथमे CRBh I; प्रार्थ्यते CRP.

1556.

दोषाकरोऽपि हन्तव्यो गृहजातोऽपि मूषकः ।
न ते यत्र न तत्राहं यत्राहं तत्र वाजिनः ॥

(आ) CRBh II 7.51. (Cf. No. 1555).
(*a*) दोषाकारो CRBh II.
(*b*) गृहजातेपि CRBh II.

1557.

द्विजिह्वः क्रूरकर्मा च खल एकान्तदारुणः ।
परस्य सहजं दोषं प्रकाशयति नो महान् ॥

(*a*) CLṢ 5.7.
(*a*) द्विजिन्हः CLṢ.
(*b*) एकंत° CLṢ.

1558.

द्विजिह्वाः क्रूरकर्माणो नित्यं छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव ॥

(आ) CRT 3.25. (Cf. No. 1761).

(इ) PtsK 1.74.

(ई) IS 3021.

(*b*) निष्ठा [नि°] PtsK.

1558 A.

द्वे कर्मणी नरः कुर्वन्न् अस्मिँल्लोके विरोचते ।
अब्रुवन्परुषं किंचिद् असतो नार्थयंस्तथा ॥

(आ) CVNS 17.20. (For similar thoughts see No. 93).

(इ) MBh (MBh ⌊Bh⌋ 5.33.50, MBh ⌊R⌋ 5.32.58, MBh ⌊C⌋ 5.1024).

(ई) IS 3027.

(उ) SS (OJ) 123.

(*a*) कर्मणि CVNS.

(*b*) अस्मिल्लोके MBh (R), MBh (C); अस्मिंलोके CVNS; विराजते CVNS.

(*c*) अब्रुवन् CVNS.

(*d*) नर्चयंस् CVNS, MBh (R), MBh (C).

This maxim was probably incorporated in the CVNS text from MBh.

Cf. JSAIL 30.36.

ध

1559.

धनं जातिर्धनं रूपं धनं विद्या धनं यशः ।
किं धनेन विहीनानां याच्ञानिर्जीवितैर्गुणैः ॥

(आ) CRC 4.13, CPS 91.25.

Cf. Crn. 51.

1560.

धनं धर्मविदो स्वर्गं शूराणां जीवनं धनम् ।
जीवनं च धनं नार्याः निरीहस्य धनं नृपः ॥

(आ) CNI II 88.

1561.

धनं यस्य भवेन् मानः सुचिरं तस्य जीवितम् ।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ॥

(आ) CNG 254. (Cf. No. 773*).
(इ) (Cf. GP 1.115.12).
(ई) (Cf. IS 4828).

* CRB 8.10 *ab* and GP 1.115.12 *cd* is identical with CNG *cd*.

1562.

धनं रूपमवैक्लव्यं धनं कुलं सुमङ्गलम् ।
धनं यौवनमम्लानं धनमायुर्निरामयम् ॥

(आ) CRC 4.17, CPS 93.29.
(*c*) यौवनसन्नानं CPS.

Cf. Crn. 54.

1563.

धनवानकुलीनोऽपि सर्वत्र परिपूज्यते ।
शशिनो जातवंशोऽपि निर्धनः परिभूयते ॥

(आ) CNG 237. Nos. (Cf. 503,725,951).

(इ) PP 2. 104.

(ई) (Cf. SuM 4.14)

(*a*) दुष्कुलीनो PP.

(*b*) लोके पूज्यतमो नरः PP.

(*c*) °नस् तुल्यवंशो PP.

1564.

धनस्य यस्य राजतो भयं न चास्ति चौरतः ।
मृतं च यन्न मुञ्चति समर्जयस्व तद्धनम् ॥

(आ) CRT 2.21. (Cf. No. 504).

(इ) MBh (MBh ⌊Bh⌋ 12. 309. 45, MBh ⌊R⌋ 12. 321. 46, MBh ⌊C⌋ 12. 12089), GP 1. 109.21.

(ई) SV 2957.

(उ) SS (OJ) 55.

(*a*) राजभ्यो GP.

(*b*) न चौरतोऽपि वा भयम् SV; नास्ति न CRT, GP; चोरतः CRT.

(*c*) मञ्च्येत CRT, GP.

(*d*) समर्जयेच्च CRT; त्वमर्जयस्व SV.

This maxim was probably incorporated in the CRT text from MBh.

Cf. JSAIL 30. 141.

1565

धनाद्धिर्मः क्रियते धनेन see No. 1527.

1566.

धनिनः सुखिनो नित्यं निर्धना दुःखभागिनः ।
धनिनां निर्धनानां च विभागः सुखदुःखयोः ॥

(आ) CRC 4.25, CPS 95.37. (For similar thoughts see No. 93).

(*b*) °भाजना: CPS.

Cf. Crn 59.

1567.

धनिनो जातिहीनस्य विलसत्युत्तमस् तथा ।
अयोमयस्य खड्गस्य स्वर्णं कोपाद् बहिर्यथा ॥

(आ) CRC 4.19, CPS 93. 31.
(*b*) ऊत्तमो यथा CPS.
(*d*) स्वर्णं CPS.

1568.

धान्यानां संग्रहो राजन् उत्तमः सर्वसंग्रहात् ।
निक्षिप्तं हि मुखे रत्नं न कुर्यात् प्राणधारणम् ॥

(आ) CNB 124.
(इ) H (HJ 3. 58, HS 3. 55, HM 3.55, HK 3. 55, HP 3. 53, HN 3. 53, HH 82.21-2, HC 109. 19-20).
(ई) SRBh 148. 285, IS 3144.
(*c*) निःक्षिप्तं IS; निःक्षिप्तरत्नो हि मु° IS; मुखं IS.

1569.

धन्या फलकरा भूमिर् धन्यो वेदमुखो द्विजः ।
धन्यो राजा प्रजापालो धन्यं परहितं वचः ॥

(आ) CNF 79, CNI II 53.
(*a*) फलवती भूमिः CNI II.
(*b*) (illegible) द्विजः CNI II.
(*d*) द्च CNF.

1570.

धर्मः पिता क्षमा माता भार्या ज्ञेया दया तथा ।
इतरास्तु गुणाः पुत्रा बान्धवास्ते सुधीमतः ॥

(आ) CNG 291.

1571.

धर्म एव प्लवो नान्यः स्वर्गं द्रौपदि गच्छताम् ।
सैव नौः सागरस्येव वणिजः पारमृच्छतः ॥

(आ) CLP IV 7. 4.

(इ) MBh (MBh [Bh] 3.32.22, MBh [R] 3. 31.24, MBh [C] 3.1183).

(ई) SRBh 394. 690, IS 3087.

(उ) SS (OJ) 20.

(*d*) पारमिच्छत: CLP IV.

This stanza was probably incorporated in the CLP IV text from MBh.

Cf JSAIL 30. 23.

1572

धर्ममूलं गृहे नारी वेदमूलं च ब्राह्मणाः ।
तपोमूलं गुरुश्चैव तस्मात्तान् प्रतिपालयेत् ॥

(आ) CvGt 7.15.

1573.

धर्मस्थाने श्मशाने च योगिनां यादृशी भवेत् ।
यदि सा निर्मला बुद्धिः को न मुच्येत बन्धनात् ॥

(आ) CNP II 150, CM 80. (Cf. Nos. 172 and 517).

(*b*) योगिनीणां यातिथिर्भवेत् CNP II (MS) (*contra metrum*).

1574.

धर्मस्य शिखरे भूपो मूले हि श्रमणद्विजाः ।
मूलात् फलानि जातानि तस्मान् मूलं न छेदयेत् ॥

(आ) CRT 8.66.

(*a*) नृपो CRT (*contra metrum*).

(*c*) मूलाज्जातानि फलानि (*contra metrum*).

1575.

धर्मे रतिर्भवति किं बहुभिः श्रुतैश्च
जीवे दया भवति किं बहुभिः प्रदानैः ।
शान्तं मनो भवति किं बहुभिः श्रुतैश्च
आरोग्यमस्ति यदि किं त्रिभवैरसारैः ॥

(आ) CNP II 27, CM 81.

Vasantatilakā metre.

1576.

धर्मे रागः श्रुते चिन्ता दाने व्यसनमुत्तमम् ।
इन्द्रियार्थेषु वैराग्यं संप्राप्तं जन्मनः फलम् ॥

(आ) CNG 196-7.

(इ) IS 3132, Subh. 183.

1577.

धिग्धिक् शरीरसुखलालितमानवेषु
मा खेदयेद्धनकृशं हि शरीरमेव ।
सद्दारका ह्यधनपाण्डुसुताः श्रुता हि
दुःखं विहाय पुनरेव सुखं प्रपन्नाः ॥

(इ) GP 1. 111.25.

(*a*) धिक् धिक् GP, GPy; °सुखलालितलालितेषु GPy.

(*b*) बलकृशं कटकं कटेन GPy.

(*c*) सौदासरामनल [स° ह्य°] GPy; श्रुतास्ते GPy.

Vasantatilakā metre.

1578.

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी
सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयमः ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं
यस्यैते हि कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥

(आ) CRC 8. 153, CPS 341.24.

(इ) Śāntiśataka 4. 9, Śatakāvali 37.91.

(ई) SRBh 370. 103, SRK 38.14, Bṛhacchārṅgadharapaddhati 605. 94, IS 3169, Subh 7 and 97, NS 84.

(*a*) धैर्यो CPS; धर्मो IS; क्षमाशं P in Śān; पीता IS; भ्राता मनः संयमो Subh (*cf. b*); शान्तिः सदा CRC, CPS; गेहिणी (J in Śān; गेहिनी IS; देहिनी T in Śān).

(*b*) पुत्रः (सूनुः) सत्यमिदं subh; सूनुववं T in Śān; बन्धुरयं L in Śān; कीर्ति स्वयं गेहिनी Subh. (cf. *a*); मनस्संगमा B in Śān.

(*c*) दिशो पवसनं IS; ज्ञातामृतं B in Śān.

(*d*) एते यस्य P, J, J², γ in Śān, SRBh, SRK, Bṛhac°; चैते यस्य TJB in Śān; त्वैते यस्य L in Śān; यस्यास्तीह CRC, CPS; हिः कुटम्बिनो IS; ईदृक् यस्य कुटम्बिकं Subh; योगिनां IS.

Śārdūlavikrīḍita metre.

न

1579.

न कश्चिच् चण्डकोपानाम् आत्मीयो नाम भूभृताम् ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥

(आ) CVNS 15.20.
(इ) BhŚ 60.
(ई) ŚP 1376, SV 2799, SRBh 146.160, SRK 123.12, SuM 24, SRHt 81.1, IS 3184.
(*b*) नैव [ना°] IS; भूभुजाम् CVNS, BhŚ, SP, SV, SRK, SuM, SRHt, IS.
(*c*) जुह्वानं (°तं IS) CVNS; जुह्वानं SRHt, SuM, SRK; जुहूतं IS.
(*d*) दहत्येव हुताशनः SRBh, ŚP in SV fn.; स्पष्टो IS; दहत्येव हि पा° ŚP. (For other variants in BhŚ see BhŚ 60).

This maxim was probably incorporated in the CVNS text from BhŚ.

1580.

न कश्चित् कस्यचित् शत्रुर् न कश्चित् कस्यचित् सुहृत् ।
अर्थनिष्पत्तिसंबन्धो जनकस्य विकल्पयेत् ॥

(आ) CNPh 165.
(*a*) °छत्रुर् CNPh.
(*c*) अथ निष्पन्ति संपन्नो CNPh.

1581.

न कश्चित् कस्यचिन् मित्रं न कश्चित् कस्यचिद् रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस् तथा ॥

(आ) CNB 20. (Variant of No. 525).
(इ) H (HJ 1.73, HS 1.65, HM 1.70, HK 1.72, HH 17.15-6, HC 23.17-8).
(ई) IS 3189.

Cf. JSAIL 24.103.

1582.

न कोऽपि कस्यचिन् मित्रं न कोऽपि कस्यचित् प्रियः ।
सम्बन्धेन निजायन्ते सर्वे मित्राणि बान्धवाः ॥

(आ) CNPh 38.

(*c*) संबंधे CNPh.

1583.

न गार्हस्थ्यात् परो धर्मो न सुखं गृहिणीपरम् ।
न तीर्थं पितृमातृभ्यां न देवः केशवात् परः ॥

(आ) CNP II 52, CM 82.

(इ) Vet 17.3.

(*a*) गाहस्थात् CNP II; गृह° *A e* in Vet.

(*b*) गृहं [सु°] *D* in Vet; गृहणी CNP II (MS); समं [प°] *e* in Vet.

(*c*) °मातृभ्यो CNP II (MS), *abcde* in Vet.

(*d*) देवो परमात् *e* in Vet.

1584.

नग्नस्नानं गजं मत्तं गावः प्रथमसूतिकाः ।
बहूदके च कर्कटान् प्राज्ञो दूरेण वर्जयेत् ॥

(आ) CRT 8.34. (Cf. Nos. 108 and 1992).

(इ) GP 1. 115. 66 v. l.

(*a*) अश्वं श्रान्तं ग° GP.

(*c*) अनूदके च मण्डूकान् GP.

1585.

नग्ना व्यसनिनो रूक्षाः कपालाङ्कितपाणयः ।
दर्शयन्तीह लोकस्य अदातुः फलमीदृशम् ॥

(आ) CPS 376.12. (Cf. No. 458).

(इ) GP 1.109.24.

(*c*) दर्शरस्तीह CPS.

(*d*) अदत्तुः GP.

1586.

न च भवति वियोगः स्नेहविच्छेदहेतुर्
जगति गुणनिधीनां सज्जनानां कदाचित् ।
घनपटलनिरुद्धो दूरसंस्थोपि चन्द्रः
किमु कुमुदवनानां प्रेमभङ्गं करोति ॥

(आ) CRC 8.79, CPS 253.87.

(इ) VCjr 3.7.

(*a*) वियोगो दुःखविच्छेदहेतोर् CRC; °हेतोः CPS.

Mālinī metre.

1587.

न च माता पिता याति न च भ्राता सहोदरः ।
पापं पुण्यं समं याति यथा वत्सेन धेनवः ॥

(आ) CNW 104, CNG 222.

(इ) (Cf MBh ⌊R⌋ 12.321. 51-2).

(ई) IS 3229.

(*c*) पुण्यमेव स° CNG; यान्ति CNW; (याति in MSs AB).

(*d*) न सुता न च बान्धवाः CNG; बाल° [य°] CNW.

1588.

न चान्तरीक्षे न समुद्रमध्ये
न पर्वतानां विवरप्रदेशे ।
न मातृमूर्ध्नि प्रधृतस्तथाङ्के
त्यक्तुं क्षमः कर्म कृतं नरो हि ॥

(इ) GP 1.113.20.

(*b*) विविधप्रदेशे GP.

(*c*) मातृमूर्द्ध्नि GPy.

(*d*) त्यक्तु GPy (printer's error).

Upajāti metre (Upendravajrā and Indravajrā).

1589.

न जातु कामः कामानाम् उपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

(आ) CPS 377.16.

(इ) MBh (MBh ⌊Bh⌋ *ad* 1.70.44 ⌊693*; 6-7⌋ and *ad* 1.80.9 ⌊840*; 1-2⌋, MBh ⌊R⌋ 1.75.49 and 1.85. 12, MBh ⌊C⌋ 1.3174 and 1.3511), Har 1639, Mn 2. 94, Viṣṇu-purāṇa 4.10.9, Padma-purāṇa, Sṛṣtikh. 19.263, Bhāgavata-purāṇa 9.19.14, Vāyu-purāṇa (ĀnSS 49) 93.95, (cf.Pañcarātra 1.14.97).

(ई) Brāhmadharma 2.13.3, SV 3352, SRBh 166.609, SRHt 224.5, IS 3241.

(उ) SS (OJ) 429.

(*a*) जातुः CPS.

This maxim was probably borrowed from MBh or Mn.
Cf. JSAIL 27.2, JSAIL 30.8.

1590.

न जारजातस्य ललाटशृङ्गं
न सत्कुलीनस्य करेऽस्ति पद्मम् ।
यदा यदा मुञ्चति दुष्टवाक्यं
तदा तदा पश्यति जारजातम् ॥

(आ) CRC 7.13, CRBh II 3.40, CPS 186.33.

(*b*) करेऽलि CRBh II.

(*c*) वाक्यभवं [दु°] CRBh II.

Upendravajrā metre.

1591.

न टिट्टिभो गच्छति हंसलीलया
न वायसो गर्जति कोकिलस्वरम् ।
यवाः प्रकीर्णा न भवन्ति शालयस्
तथैव नीचः प्रकृतिं न मुञ्चति ॥

(आ) CnT II 27.4, CnT VII 53.

(ई) IS 3248, Subh 109.
(*a*) तट्टिट्टिभो Subh; हंसलीनया Subh.
(*b*) कोकिलास्वरं Subh.
(*c*) यवा Subh; शालयः Subh.
(*d*) मुद्मतिः Subh.

Vaṁśastha metre.

1592.

न तु कश्चित् कृते कार्ये कर्तारमनुवर्तते ।
सर्वथा वर्तमानेऽपि धैर्यबुद्धिन्तु कारयेत् ॥

(आ) CRT 7.13.
(इ) GP 1.114.24.
(*a*) यस्मिन् कस्मिन् GP.
(*c*) °मानोऽपि GP.

1593.

न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस् तं देवाः स्थविरं विदुः ॥

(आ) CVNS 12 13.
(इ) MBh (MBh ⌊Bh⌋ 3.133.11, MBh ⌊R⌋ 3. 133.11, MBh ⌊C⌋ 3. 106.31), (cf. MBh ⌊R⌋ 5.167.16), Mn 2.156. (Cf. G 16.21-3).
(ई) BrDh. 2.4. 11, Smṛtimuktāphalam 104. 27, IS 3275.
(*a*) स्थविरो भवति MBh, some Mn MSs, Smṛtimuktāphalam (cf. JSAIL 27.5); स्थविरो ज्ञेयो one Mn text (cf. CstMn).
(*c*) बालोपि यः प्रजानाति MBh.
(*d*) देवा CVNS.

This maxim was probably incorporated in CVNS from Mn.

Cf. JSAIL 27. 5 and 30.26.

1594.

न त्वया सदृशी दूती त्रैलोक्ये सचराचरे ।
या करोत्यमरस्त्रीणां मानुषैः सह संगमम् ॥

(आ) CNP II 96, CM 84.

(*a*) सादृशीदूूतीं CNP II (MS).
(*b*) सदूचराचरे CNP II (MS).

1595.

न दानैः शुध्यते नारी नोपवासशतैरपि ।
अव्रतापि भवेच्छुद्धा भर्तृतद्गतमानसा ॥

(आ) CNI I 165. (Cf. No. 536).
(इ) Vet 4.22.
(ई) SRBh 393.655 *ab*, IS 3285.
(*a*) दाने B in Vet.
(*b*) नोपचार° *c* in Vet; नोपवासैर्व्रतैस्तथा *d* in Vet; °वासैः शतैरपि *D* in Vet.
(*c*) अव्रता *A* in Vet; °भिभवेच्च् *d* in Vet; भवे CNI I.
(*d*) भर्तुस् CNI I, *ac/de* in Vet; तद्गत om. *a* in Vet; चेतो यस्याः सदा भवे *D* in Vet.

1595 A.

नदीनां च कुलानां च मुनीनां च महात्मनाम् ।
परीक्षा न प्रकर्तव्या स्त्रीणां दुश्चरितस्य च ॥

(इ) In SRBh 165. 540 ascribed to Cāṇkya 27.

1596.

नदीनामग्निहोत्राणां भारतस्य कुलस्य च ।
मूलान्वेषो न कर्तव्यो मूलाद्दोषो न हीयते ॥

(इ) GP 1.115.57.
(*d*) मूलाद्दोषेण हीयते GP.

Thalakwadi, Belgaum, 1955.

1597.

न नरस्य नरो दासः किं तु वित्तस्य भूपते ।
गौरवं लाघवं चापि धनाधननिबन्धनम् ॥

(आ) CNB 125.
(इ) H (HJ 3.81, HS 3.78, HM 3.78, HK 3.78, HP 3.76, HN 3.76, HH 85.15-6, HC 115.1-2). Cf. GhN 4.
(ई) SRBh 64 7, IS 3320, (cf. 593).

(*a*) दासो SRBh.
(*b*) दासश्चार्थस्य भू° SRBh; द्रव्यस्य [वि°] IS; भूपतेः IS.
(*c*) वापि SRBh.

1598.

न पुत्रत्वेन पूज्यन्ते गुणैरासाद्यते पदम् ।
रवेर्व्यापारसादृक्ते प्रदीपो न पुनः शनिः ॥

(आ) CNI I 338.
(ई) ŚP 1486, SRBh 81.4, IS 3341.
(*a*) पूज्यत्वं CNI I.
(*c*) रवेव्यपिर° CNI I.
(*d*) प्रदीनो CNI I.

1599.

न प्रदानैः क्षयं यान्ति नोपभोगेन सम्पदः ।
पूर्वार्जितानामन्यत्र सुकृतानां क्षयं विना ॥

(आ) CRC 6.6, CRB 6.5, CRCa I 6.4, CRT 6.8, CPS 160.71.
(उ) SS (OJ) 168.
(*a*) न दानेन CRB; याति CRT.
(*b*) न च भो° CRP; बर्धितः [स°] CRT.
(*d*) क्ष° वि° tr. CRCa I.

1600.

न बालेषु स्नेहं वहति न जरत्स्वादरनवं
न दाक्षिण्यच्छाया युवतिषु न शास्त्रेषु करुणा ।
य एवं निःसीमा तरुणहृदयः पीनकठिनः
स मृत्युः कालं न क्षमत इति मा कार्ष्ट मनसि ॥

(आ) CRC 6.83, CPS 156.62. (Cf. No. 1212).
(*c*) निस्सीमा CRC.
Śikhariṇī metre.

1601.

न भवेद् दुर्विपाकेऽपि प्रलयः समयं विना ।
प्रसन्नमप्यसून् हन्ति जन्तोः प्राप्तावधेः पुनः ॥

(आ) CRC 6.92, CPS 149.41.

1602.

नमः शिवाय साम्बाय सगणाय ससूनवे ।
सनन्दिने सगङ्गाय सवृषाय नमोनमः ॥

(आ) CRBh II 5.20 (Partly illegible).

1603

न माता न पिता भार्या न पुत्रा न च बान्धवाः ।
यमान्तिकं प्रयातस्य सुकृतं दुष्कृतं व्रजेत् ॥

(आ) CNN 23.
(इ) Vet 23.8.
(*ab*) पिता भ्राता न भार्या AB *d* in Vet.
(*b*) पुत्रो Vet.
(*c*) अनुप्राप्य [°प्र] Vet; अनुप्राप्त B in Vet.
(*d*) सुकृतदुः° B in Vet; दुःकृतं CNN, Vet.

1604.

न माता शपते पुत्रं न दोषं लभते मही ।
न हिंसां कुरुते साधुर् न देवः सृष्टिनाशकः ॥

(आ) CPS 374.5.
(इ) Dharmaviveka 18 (KSH 509).
(ई) SRBh 168.669, IS 3371.
(*b*) दोषो CPS; महीम् CPS.

1605.

न मित्रं कस्यचित् कोऽपि नितान्तं न च वैरकृत् ।
दृश्यते मित्रविध्वस्तः कार्याद्वैरिप्ररक्षितः ॥

(आ) CnT II 20.1, CnT III 52.8.
(इ) P (PtsK 2.121, Pts 2.113).
(ई) IS 4854.
(*a*) मित्रं कोऽपि न कस्यापि Pts.
(*c*) विध्वस्तात् PtsK.
(*d*) वैरी परीक्षितः PtsK.

1606.

न यत्रास्ति गतिर्वायो रश्मीनां च विवस्वतः ।
तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥

(आ) CVNS 10.20.
(इ) P (PP 5.35, Pts 5.48, PtsK 5.37, PM 5. 19).
(ई) IS 3385.
(*c*) हि विश° PP; हि विशुत्याषु Pr in PP.
(*d*) बुद्धि CVNS; द्धिर् (बु° missing) M in PP.

1607.

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥

(आ) CvL I 8.40.
(इ) BhŚ 562, P (PP 1.101, Pts 1.131, PtsK 1.147, PD 307. 103, PM 1.63).
(ई) ŚP 1353, SRBh 152.409, IS 3396.
(*a*) द्विष्यतां Pr in PP; वाति [या°] CvL I.
(*b*) °पदिहि° CvL I; मुच्यते CvL I; मानविद्रै CvL I; पार्थिवेन SRBh; *psi*, P,L_1, Pr, M in PP; भूमिपालैः PD.
(*c*) महतो Pr in PP; विद्यमाने SRBh; दृश्यमाने [व°] PD.
(*d*) नर° [नृप°] CvL I; °जनपनां (°द° om.) CvL I; दुर्लभिः CvL I; °कर्त्ताः CvL I.

Mālinī metre.

1608.

न राज्ञा सह मित्रत्वं न सर्पो निर्विषः क्वचित् ।
न कुलं निर्मलं तत्र स्त्रीजनो यत्र जायते ॥

(आ) CvP IV 8.17, CvTb 8.17, CNG 55, CNM 147, CNMN 113, CNP II 173, (CNT IV 149), CRBh II 3.43, CRT 3.6, CRCa I 3.30, CM 85. (Cf. Nos. 250,305,1349, 1635).
(इ) GP 1.110.9.

(*b*) न सर्पा निर्विखा क° CNPN, CNM; सर्पे CRBh II; न विषं CvP IV (unclear); निर्विषो भवेत् CRBh II, CRCa I.

(*c*) कुल CNM.

(*d*) जायत CRCa I; गायति CNPN; याचते CvTb.

Cf Crn. 263.

1609.

न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोऽत्तमम् ॥

(आ) CNB 128.

(इ) MBh (MBh ⌊Bh⌋ 5.34.12, MBh ⌊R⌋ 5.33. 11 *bis*, MBh ⌊C⌋ 5.1105), H (HJ 3.116, HS 3.111, HM 3.112, HK 3.112, HP 3.109, HH 92.17.8, HC 123.8-9).

(ई) IS 3399.

This maxim was probably included in the text of CNB from MBh or through H.

Cf. JSAIL 30.40.

1610.

नरानर्थकरं द्यूतं मोक्तव्यं शीलशालिना ।
शीलं विनश्यते येन तस्माद् द्यूतं परित्यजेत् ॥

(आ) CNP II 109, CM 86. (Cf. No. 1308,1618,1956).

(इ) Vet 21.2.

(*a*) नानानर्थ° Vet.

(*b*) मौक्तिकं शौल° CNP II (MS); भोक्त° *a* in Vet; शूलपाणिना *a* in Vet; शीलपाणिना *d* in Vet; °नः *A* in Vet.

(*c*) शीलोऽपि *A* in Vet; शीलं च *cd* in Vet; हि नश्यते Vet; तेन [ये°] Vet (*a* in Vet as above).

(*d*) गरलेनेऽव जीवितम् Vet (तस्माद् द्यूतं न कारयेत् *c* in Vet); तस्मा द्यूतं परित्य जत CNP II (MS).

1611.

नरेशे जीवलोकोऽयं निमीलति निमीलति ।
उदेत्युदीयमाने च रवाविव सरोरुहम् ॥

(आ) CNB 130.

(इ) H (HJ 3.148, HS 3.142, HM 3. 145, HK 3.146, HP 3.142, HN 3.142, HM 97.1-2, HC 129.8-9), KN 4.42.
(ई) SRBh 145.128, IS 3402.
(*a*) जीवलोक्यं CNB; नरेश्वरे जगत्सर्वं KN.
(*b*) उन्मीलति नि° IS; न मीलिति न मीलिति IS; न मीलति नि° IS.
(*c*) सूर्योदये यथा (इव IS) ऽम्भोजं KN.
(*d*) तत्प्रबोधे प्रबुध्यते KN.

1612.

नवं वस्त्रं नवं छत्रं वनानां च नवं फलम् ।
सर्वं नवं प्रशंसीयात् सेवकं च पुरातनम् ॥

(आ) CNPN 76, CM 87.
(इ) (Cf. Nītipradipa in KSH 528).
(*c*) नत्र प्रशंसुयात् CNPN (MS).
(*d*) पुरातनः CNPN (MS).

Cf. Crn. 179.

1613.

नवनीतोपमा वाणी करुणाकोमलं मनः ।
एकबीजप्रजातानां भवत्यवनतं शिरः ॥

(आ) CRC 7.11, CPS 187.34.
(इ) PdP, Sṛṣṭikhaṇḍa 51.33, Kṣemendra's Darpadalana 1.56.
(ई) SRBh 385.312 v.l., JS 446.3, SuM 9.27 *ab*.
(*b*) °रुणा को° CPC, CPS; मनः कुसुमकोमलम् SuM.
(*c*) धर्मबीजप्रसूतानाम् PdP, SRBh.
(*d*) एतत्प्रत्यक्षलक्षणम् PdP, SRBh, JS.

1614.

न विश्वसेदमित्रस्य मित्रस्यापि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥

(आ) CNG 87.(Cf. Nos. 565 and 566).
(इ) (Cf. MBh [R] 1.142.60-1; 5.37.9; 12.128. 190; 12.138. 142; 12.140. 43, Har 1164, PP 2. 83. 3, 1 and 4.12, PT 3.1, PS 3.1, PN 3.1, Pts 3.1,PtsK 3.1, GP 1.114.47, Śts 20.11-2).

(ई) ŚP 1301, SV 2734, ŚKDr *ad* विश्वास, SRBh 160.323 *ab*, IS 3429.
(*a*) अविश्वस्ते [अमि°] SV.
(*b*) विश्वस्ते नातिवि° SV.

1615.

न विषं भक्षयेत् प्राज्ञो न क्रीडेत् पन्नगैः सह ।
न निन्देद्योगिवृन्दानि ब्रह्मद्वेषं न कारयेत् ॥

(आ) CnT II 11.9, CnT III 7.31, CnT VI 57.
(इ) VCsr VII 2 and 31.3, VCmr VII 16-7 and 31.99-100.
(ई) IS 3439.
(*a*) भक्षयत् V in VCsr VII 31.
(*c*) निन्द्याद् (°देद् MJQ in VCsr VII 2, Nd in VCsr; °द्यो VT in VCsr VII 2; °द्येद् MJ in VCsr 31.3) VCsr VII 2 and 31.3; निन्द्यमन्नमश्नीयाद् VCmr. 31.100; नोल्लङ्घितनिमित्तानि VCbr VII 16; °वृन्दं च M in VCsr VII 31; वृदानि IS.
(*d*) न ब्र°.........°आचरेत् VCbr VII 17; द्वेष IS.

1616.

न विषं विषमित्याहुर् ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥

(आ) CRC 7.88, CPS 184.27.
(इ) VCsr V 2. See Kūrma-purāṇa in ŚKDr *ad* विष.
(ई) AlR 139, AlK 238 *ab*, SRBh 98.1, IS3437.
(उ) Vyās (C) 39.
(*b*) ऋणं [°स्वं] SRBh (fn.).
(*cd*) देवस्वं चापि यत्नेन सदा परिहरेत्ततः Kūrma-purāṇa.
(*d*) तु ससन्ततिम् [पु°] AlR.

1617.

नवे वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥

(इ) GP 1.114.73.
(ई) SV 2999, SRBh 156.134, SRK 226.53.

(उ) ShD (T) 126.
(*b*) कन्थते [मे मतिः] SV.
(*d*) शान्तिः [शमः] SRBh, SRK.

1618.

न श्रियस्तत्र तिष्ठन्ति यत्र द्यूतं प्रवर्तते ।
न वृक्षो जायते तत्र विद्यन्ते यत्र छेदकाः ॥

(आ) CNP II 112. (Cf. Nos. 1308, 1619, 1956), CM 88.
(इ) *Bc* in Vet (after 21.3 ⌊p. 191⌋).
(*a*) न श्रियो वर्तन्ते तत्र CNP II; न श्रिया वत्तते त त° CNP II (MS); यत्र ⌊त°⌋ *b* in Vet.
(*d*) विद्यते यत्र पावकः Vet; छेद्का CNP II (MS).

1619.

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
अतिक्रान्तमतिक्रान्तं नष्टं नष्टं मृतं मृतम् ॥

(आ) CNP II 270, CM 89.
(इ) (Cf. PP 1.336, Pts 1.333, PtsK 1.378).
(ई) (Cf. SRBh 164.513, IS 3473 where *ab* are identical with *ab* of CNP II 270).
(*a*) नष्ट CNP II (MS).
(*b*) मानु° CNP II (MS).

1620.

न सुखं धनलुब्धानां न धर्मो दुष्टचेतसाम् ।
न चार्थो भाग्यहीनानाम् औषधं न गतायुषाम् ॥

(आ) CvP IV 3.4, CvGt 3.2, CvTb 3.4, CvH 3.2, CnT II 4.6, CnT III 3.6, CnT VI 44, CM 90.
(*a*) °लुब्धस्य CvP IV, CvGt, CvH.
(*c*) न चार्था CvGt.
(*d*) ओषधं CvTb; नौषधं च CvGt; गतायुषः CvP IV.

1621.

न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥

(आ) CNF 40. (Cf. No. 1622).

(इ) H (HJ 1.124 and 4.7, HS 1. 189, HM 1.116, HK 1.119 and 4.7, HP 1.155 and 4.7, HN 1.156 and 4.7, HH 24.16-7, HC 33.9-10 and 133.10-1). (Cf. MBh ⌊R⌋ 13.39.5, Śiva-purāṇa quoted in IS 531).

(ई) SRBh 349.41, IS 3496.

(*a*) नारिणां [स्त्री°] B in HP 4.7.

Cf. JSAIL 24.76-76A.

1622

न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
पुरातनं निवर्तन्ते प्रार्थयन्ति नवं नवम् ॥

(आ) CNPN 55, CM 83. (Cf. 1621).

(*a*) न च स्त्रीणां प्रियः CNPN.

(*b*) प्रिया CNPN.

(*c*) निवरन्ति CNPN.

1623.

न स्थातव्यं न गन्तव्यं क्षणमप्यधमैः सह ।
पयोऽपि शौण्डिनीहस्ते मदिरां मन्यते जनः ॥

(आ) CNN 43, CNI II 96. (Cf. No. 112).

(ई) ŚP 324, SRBh 167.626, IS 3498, Subh 63. (Cf. SuB 13 B. 1).

(*a*) नाऽस्था° Subh.

(*b*) असता CNI II; असतां Subh.

(*c*) शौण्डिकी° SRBh; सौण्डिनी IS; शोण्डिनी Subh.

(*d*) वारुणीत्यभिधीयते CNI II, Subh; मदिरा ŚP, IS.

1624.

न हि किंचित् कृते कार्ये कर्तारं समुपेक्षते ।
तस्मात् सर्वाणि कार्याणि सावशेषाणि कारयेत् ॥

(आ) CNSap 59.

(इ) (Cf. MBh ⌊Bh⌋ 12.138.20, MBh ⌊R⌋ 1.140.79 and 12.140.20, MBh ⌊C⌋ 12,5266).

(ई) SV 2761.

(*a*) कश्चित् SV.

(*b*) समवेक्षते SV.

1625.

न हि संगतिदोषेण साधवो यान्ति विक्रियाम् ।
भुजङ्गैर्वेष्ट्यमानोऽपि चन्दनो न विषायते ॥

(आ) CvP IV 3.8, CvGt 3.6, CvTb 3.10, CvH 3.8, CnT II 5.3, CnT III 3.15, CnT VI 53, CM 91.

(*a*) संसर्गदोषेण CvP IV, CnT.

(*b*) वि° या° सा° tr. CvP IV; साधुर्भुजति विक्रयां CvTb.

(*c*) भुजंगैर् CvP IV; °वेष्टमानो CvH; विव्यमानो CvTb.

(*d*) चन्दमनो CvH; विषायवति CvP IV.

1626.

नातिदूरे समीपे च धनाढ्ये नातिदुर्बले ।
वृत्तिहीनेऽङ्गहीने च षड्भ्यः कन्या न दीयते ॥

(आ) CNPh 24 (reconstructed).

(ई) IS 3554, Subh 186.

(*a*) न चासन्ने [स° च] Subh.

(*b*) नात्याढ्ये [ध°] CNPh; नातिदुर्व्वने Subh (MS).

(*c*) वृति° CNPh; व्याधिते Subh; च मूर्खे CNPh (*contra metrum*).

(*d*) षड्भिः Subh (MS); षभ्यः CNPh.

1627.

नात्यन्तं मृदुना भाव्यं मृदुः सर्वत्र पीड्यते ।
मृदुं हि कदलं दृष्ट्वा को नावकर्तुमिच्छति ॥

(आ) CNPh 85 (corrupt), CNI I 49, CNG 154.

(इ) (Cf. GP 1.114.49).

(*a*) नाभाव्यं [भा° तु] CNPh, CNI I; मृदु भाव्यं तु CNG.

(*b*) बाध्यते [पी°] CNPh, CNI I.

(*c*) असारं (सारं CNPh) कर्दली दृष्ट्वा (कदली मत्वा CNPh) CNI I, CNPh.

(*d*) हर्तुं (छेतुं CNPh) को नसमीहते CNI I, CNPh.

1628.

नानाशास्त्रं पठित्वा तु विचार्य च पुनः पुनः ।
न सभा रञ्जिता येन धिक् तं धिक् तं न संशयः ॥

(आ) CvGt 6.18.

(*a*) पिठि चातुर् CvGt.

(*c*) रञ्जितो CvGt.
(*d*) धिक्कं धिक्कं CvGt.

1629.

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥

(आ) CNŚ 98, CNŚL 98, CNŚC 99, CNŚI 99, CNŚPK 79, CPS 354.3.
(इ) MBh (MBh [Bh] 5.33.23, MBh [R] 5.32.28, MBh [C] 5.993), H (HJ 1.181, HS 1.161, HM 1.165, HK 1.167, HP 1.127, HN 1.128, HH 30.20-1, HC 41.8-9).
(ई) SRBh 163.458, IS 3596.
(उ) LN (P) 65, NKy (B) 96.
(*c*) आपत्सु च MBh.

This maxim was probably incorporated in the four texts of the CN version from MBh.

Cf. JSAIL 30.31.

1630.

नाभुक्तं क्रियते कर्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥

(आ) CNPN 86.
(ई) TP 379, IS 7573.
(*a*) मा भुङ्क्त्वा CNPN (MS); मा भुक्तं TP; क्षीयते TP.
(*b*) जन्म° [क°] CNPN (MS).

1631.

नामृतं न विषं किंचिद् एकां मुक्त्वा नितम्बिनीम् ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥

(आ) CNP II 175, CRC 8.90, CPS 250.82.
(इ) BhŚ 91, P (PP 4.29, Pts 4.32, PtsK 4.34).
(ई) SRBh 251.10, SRK 114.11, IS 3608, Subh 12.
(*a*) नामनं W_4 in BhŚ; नामृत IS; विनामृतं विषं Y_3 in BhŚ; नाविषं X_1G_{2t} in BhŚ; मृषं Y_4 in BhŚ; कश्चिद् CRC.
(*b*) एकैत्र तु C in BhŚ; एका W in BhŚ; एकेन तु CRC, CPS; विना [ए°] $Y_3X_2M_1$ in BhŚ; एतां $Y_{2,4}G_{3,4}$; एनां $G_5M_{4,5}$ in BhŚ; एषां Pr in PP; मुक्ता $A_3J_{1,2t}$ W in BhŚ; मुक्तां $X_{1\cdot 2}$ in BhŚ; मुग्धा Y_3 in BhŚ; मुग्धां M_1 in BhŚ; उक्ता [मु°]

M_3 in BhŚ; उत्त्वा N in PP; नितंबिनी CRC, CPS, B,C,$E_{3,5}$,I,J_{1t} WM_3 in BhŚ.

(*c*) शैवा° W_4 in BhŚ; ऽमृतनुरक्ता स्त्री CRC, CPS; ऽमृतमयी $BDE_{0-2,4C}$ $F_{1,2}$ G_4 in BhŚ; ऽमृतरसालक्ता G_{2t} in BhŚ; यस्याः सङ्गेन जीव्येत Pts, PtsK, SRBh; जीव्यते सङ्गतो (शंगतौ PPr in PP; संगतौ *Psi* in PP) यस्या PP.

(*d*) वियुक्ता Y_6 in BhŚ; म्रियते (मृ° PtsK; म्रियेत Pts, PtsK, SRBh) च वियोगतः PP, Pts, PtsK, SRBh.

1632.

नारीणां कोमलाः प्राणाः पुंसां तेऽतीव निष्ठुराः ।
तस्मान् नारीषु पुंसु च प्रभेदो विद्यते महान् ॥

(आ) CNŚ A 75 (replaces CN 73, No. 531). (Cf. CnT II 17.9, CnT III 7b 18).

(*b*) पुंसा: CNŚ.

1633.

नासुरोऽयं न वा नागो धरासंस्थो हि राक्षसः ।
नासुखोऽयं न वाभोगो धरासंस्थो हि राजसः ॥

(आ) CvP IV. (One of the four closing stanzas[1]), CM 93. (On the last page of the MS. repeated on the next page on which it is inserted into a drawing (particularly *d*).

(*b*) न [हि] CvP IV (second time).

[1]. Note the word-play *ab* against *cd*.

1634.

नास्ति भार्या कुतः शाला धनं नास्ति कुतः सुखम् ।
नास्ति भूमिः कुतः सस्यं नास्ति ग्रामः कुतः सीमा ॥

(आ) CNF 70, CNPN 73, CM 94.

(ई) Cf. TP 426 (IS 7575):

(*a*) शीलं [शा°] Teza in GSAI 45 (cf. CM *ad* 94, p. 72).

(*c*) नास्ति ज्ञानं कुतो धर्मो CNF; धर्मा CNF (MS).

(*d*) कुतो सि ा CNF (MS); सिमा CNPN.

Cf. Crn. 106.

1635.

नास्ति मैत्रं नरेन्द्रैश्च नास्ति मैत्रं खलैः सह ।
नास्ति मैत्रयबोधैश्च न च क्रीडा भुजङ्गमैः ॥

(आ) CNW 103, CNPh 73 v.l. (Cf. Nos. 250,305,1349,1608).
(ई) IS 3677.
(*a*) मैत्री नरेंद्रेण CNPh.
(*b*) मैत्री खलेन च CNPh.
(*c*) कैः सहनो मैत्री CNPh.
(*d*) नास्ति मैत्री च योषिता CNPh.

Cf. Crn. 265.

1635 A.

नास्ति वेदात् परो धर्मो नास्ति मातृसमो गुरुः ।
न च दानात् परमिष्टम् इह लोके परत्र च ॥

(आ) CvTb 8.27, CM 187.
(इ) (Cf. MBh ⌊Bh⌋ 12.109,16;13.105,15.
(ई) (Cf. Brāhmadharma 2.1.5).
(*b*) मातृसमा गुरु CvTb.

1636.

नास्ति सर्पेषु विश्वासः प्राप्तवेगे हये गजे ।
परस्वे परदारे च स्वदारे च परं गते ॥

(आ) CNI I 106 (partly illegible and reconstructed), CNSap 65.
(*a*) सर्वेषु CNI I; विश्वासो CNI I.
(*b*) न च वाले रिपौ गते CNI I (?)
(*d*) परे CNI I.

1637.

नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषितम् ।
पतिं संसेवते या तु तेन स्वर्गे महीयते ॥

(आ) CNPh 93. (Cf. Nos. 1213 and 1672).
(इ) Mn 5.155, Vi 25.15 (for *nibandha-s* see JSAIL 27.17), MP 16.61.
(ई) SRBh 351.16, IS 3686.

(*a*) पृथक् CNPh; जपो *nibandha-s*; धर्मो [य°] or याजो *nibandha-*.
(*b*) श्राद्धं [व्र°] MP; उपोषणम् Mn.
(*c*) शुश्रूषयति भर्तारं *nibandha-s*; पतिः *nibandha-s*; शुश्रूषते Mn, Vi; संसेव्यते *nibandha-s*; येन [या तु] Mn; ते न [या तु] *nibandha-s*; यत्तु Vi.
(*cd*) भर्तृशुश्रूषयैवैतान् लोकानिष्टान् व्रजन्ति हि MP.

Cf. JSAIL 27.17.

1638.

नास्त्यारोग्यसमं मित्रं न च धर्मसमो गुणः ।
न चापत्यसमः स्नेहो न च दुःखं क्षुधासमम् ॥

(आ) CNG 39. (Cf. No. 531).
(इ) PP 1.161.
(ई) IS 3690.
(उ) Vyās (C) 20.
(*b*) नास्ति व्याधिसमो रिपुः PP.
(*c*) °सम° bhN in PP.

1639.

नाहं काको महाराज हंसोऽहं विमले जले ।
मयि नीचगसङ्गेन मृत्युरेव न संशयः ॥

(आ) CNP II 223, CM 95.
(*c*) नीचसंगन CNP II (MS).

1640.

नाहं वसामि कैलासे न मेरौ न च मन्दरे ।
मया विश्रम्यते तत्र यत्र नादो मनोरमः ॥

(आ) CRBh II 5.25. (Partly illegible and reconstructed). (Cf Nos. 1641-2).

1641.

नाहं वसामि ब्रह्माण्डे पङ्कजेषु कदाचन ।
मया विश्राम्यते तत्र यत्र वेदध्वनिर्महान् ॥

(आ) CRBh II 5.27 (Partly illegible and reconstructed). (Cf. Nos. 1640 and 1642).
(*c*) विश्रमते CRBh II.
(*d*) °महत् CRBh II.

1642.

नाहं वसामि वैकुण्ठे योगिनां हृदये न वा ।
मद्भक्ता यत्र गायन्ते वसामि तत्र नारद ॥

(आ) CRBh II 5.26 (Partly illegible and reconstructed). (Cf. Nos. 1640-1).
(*b*) च or वा added on the margin.

1643.

निःशङ्कं किं मनुष्याः कुरुत परहिते युक्तमग्रे हितं यत्
मोदध्वं कामिनीभिर्मदनशरहता मन्दमन्दातिदृष्ट्या ।
मा पापं संकुरुध्वं द्विजहरिपरभाः संभजध्वं सदैव
आयुर्निःशेषमेति स्खलति जलघटीभूतमृत्युच्छलेन ॥

(इ) GP 1.111.11.
(*b*) मन्दमन्दातिदृष्टाः GPy.
(*d*) मृत्युभूतच्छलेन GPy; °भूतनृत्युच्छलेन GP (printer's error).
Sragdharā metre.

1644.

नित्यं जनेन सेव्यानि नैकत्रापि च विश्वसेत् ।
स्वभावसंचिता मैत्री सत्यप्रज्ञावृतं कुलम् ॥

(आ) CNPh 170. (Partly illegible and reconstructed).

1645.

निद्रा भद्रे कुतस् तेषां ये ऋणव्याधिपीडिताः ।
अविधेयकलत्राश्च ये चान्ये कृतवैरिणः ॥

(आ) CvP IV 3.13, CvGt 3.10, CvTb 3.18, CNP II 217, CNT IV 245.
(इ) Śts 25. 1.
(ई) IS 3720.
(*a*) तात [भ°] CvP IV, CvGt: तावत् [भ°] CvTb; चैव कुरुतस् ते° CNP II.
(*b*) गुरु° [ऋ°] Śts (var.); पण्डिताः CNP II.
(*c*) अव° CvTb; °लात्राणां (°ल° Śts [var.]), CNP II, Śts (var.); °लभाश् CvGt; °कलत्रांश्च Śts (var.); अस्वाधीनकलत्रा ये Śts (var.).
(*d*) यौर्जिताश्च न वै° Śts (var.); बहु° [कृ°] CvTb; तत° [कृ°] CNP II; °वारिण CNP II; °वैरिणाः IS.

1646.

निर्दोषमपि वित्ताढ्यं दोषैर्योजयते नृपः ।
निर्धनः प्राप्तदोषोऽपि सर्वत्र निरुपद्रवः ॥

(आ) CnT II 20.4, CnT III 53.2.
(इ) P (Pts 2.117, PtsK 2.125).
(ई) IS 3760.

1647.

निर्बीजमक्षरं नास्ति नास्ति मूलं निरौषधम् ।
पृथिवी निर्धना नास्ति उपदेशो हि दुर्लभः ॥

(आ) CNP II 60, CM 111 *cb/ad.*
(ई) (Cf. Bhāminī-vilāsa Intr 26, VCjr 22.6).
(*a*) न बीजं CNP II (MS).
(*c*) पृथ्वी CNP II (MS).

1648.

निर्वाणदीपे किमु तैलदानं
चौरे गते वा किमुतावधानम् ।
पयोगते वा किमु सेतुबन्धो
वयोगते किं युवतीविलासः ॥

(आ) CNW 89.
(इ) Nītipradīpa 13 *ab/dc* (KSH 528), Padyasaṁgraha 8 *ab/dc* (KSH 530).
(ई) SRBh 173.874 *ab/dc*, IS 3767.
(*b*) All texts have किमु साव°; my change to किमुताव°.
(*c*) किं खलु सेतुबन्धः Nītipradīpa, Padyasaṁgraha, SRBh.
(*d*) वनिता° [यु°] Nītipradīpa, Padyasaṁgraha, SRBh; सेतुबन्धं CNW.

Upajāti metre (Indravajrā and Upendravajrā).

1649.

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥

(आ) CNL 90.

(इ) H (HJ 4.14, HS 4.12, HM 4.13, HK 4.14, HP 4.14, HN 4.14, HH 102.5-6, HC 136.8-9).

(ई) IS 3794.

(*b*) लोप्तुम् [हु°] HJ.

(*d*) ......मः [य°] CNL.

1650.

नीचाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः ।
अजा सिंहप्रसादेन आरूढा गजमस्तके ॥

(आ) CNN 31, CnT II 18.10, CnT III 8.4.

(इ) PM 3.77.

(ई) SuM 7*, IS 3797, Subh 199.

(*a*) कर्तव्यो CNN, Subh.

(*b*) महताश्रयः Subh.

1651.

नीतिशास्त्रं प्रवक्ष्यामि चाणक्येन तु भाषितम् ।
येन विज्ञानमात्रेण वृद्धिर्विकसते नृणाम् ॥

(आ) CNP I 1, CNM 1, CNMN 1. (Introductory stanza to CN).

(*b*) चाणिक्येंन सुभाषितं CNM.

(*c*) यस्य CNM,

(*d*) °विकसिते CNM.

1652.

नीतिसारं प्रवक्ष्यामि अर्थशास्त्रादिसंश्रितम् ।
राजादिभ्यो हितं पुण्यम् आयुः स्वर्गादिदायकम् ॥

(आ) CRCa II 1.

(इ) GP 1.108.1.

(*b*) सर्वशास्त्रार्थनिश्चितं CRCa II,

(*d*) आयुरारोग्यदा° CRCa II.

Cf. Crn. 3.

1653.

नीतिसारं सुरेन्द्राय इममूचे बृहस्पतिः ।
सर्वज्ञो येन चेन्द्रोऽभूद् दैत्यान् हत्वाप्नुयाद् दिवम् ॥

(इ) GP 1.108.10.
(*b*) वृहस्पति: GP, GPy.

1654.

नृपः सहायः पृथुदम्भभृद् व्रती
प्रियंवदोऽरिर्वणिगल्पजल्पनः ।
विशाललीलाभ्यधिकावगुण्ठना
वधूश्च संज्ञायतनं विशेषतः ॥

(आ) CRB 7.50, CRP 7.48, CRBh I 7.48.
(*a*) व्रजीति CRBh I (*contra metrum*).
(*b*) °वदोरि CRP; वणिवरा° CRBh I (*contra metrum*).
(*d*) वध्यश्च CRBh I; विशेष· CRBh I (*contra metrum*).

Vaṁśastha metre.

1655.

नृपो हि वृक्षः श्रमणश्च मूलम्
जनाश्च पत्राणि प्रशाखमन्त्री ।
मूलेषु नष्टेषु तरोर्विनाशः
भिक्षुद्विजास्तेन तथैव रक्ष्याः ॥

(आ) CRT 8.67. (Cf. No. 2044).
(*d*) भिक्षुद्विजास्ततस्तैव CRT.

Upajāti metre (Upendravajrā and Indravajrā).

1656.

नैकत्र परिनिष्ठास्ति ज्ञानस्य किल चोत्तम ।
सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कुत्रचित् ॥

(आ) CRT 3.30.
(इ) GP 1.110.29.
(*b*) शौनक [चो°] GP.

1657.

नोत्सृजेत् कृपणो दानं पुनर्दारिद्र्यशङ्कया ।
प्राज्ञो बुधो सृजेद् दानं पुनर्दारिद्र्यशङ्कया ॥

(आ) CRP 1.14, CRBh I 1.14, CRBh II 1.14.
(*a*) नोसृजेत् CRBh II; कृपणं CRBh I; कृपणे CRP.
(*b*) °संकया CRBh I, CRBh II.
(*c*) प्राज्ञोर्विथो CRBh I; विधौ CRP; बुधः [वि°] CRBh II; °दान CRBh II.
(*d*) नाभाव्यं तत्रासंकया CRBh II; संकया CRBh I.

1658.

नोपात्तं द्रविणं कुलं न गणितं मित्रं च नोपार्जितं
शास्त्रं नाधिगतं तपो न चरितं नो क्रीडितं वाजिभिः ।
कान्ताकोमलपल्लवाधररसं पीतं न चन्द्रोदये
तारुण्यं गतमेव निष्फलतया शून्यालये दीपवत् ॥

(आ) CRC 8.34, CPS 225.17.
(इ) *ad* Vet 14.159 in *D* v.l.
(ई) Subh 67 *ab* v.l., IS 3836 *ab* v.l.
(*a*) ना पात्तं [नो°] Vet; द्रविण कलानुगणितं वित्तं Vet; कला [कु°] Subh; गुणिता Subh; चोपार्जितं CRC, CPS.
(*b*) नोगदितं Vet; व्रतं [तपो] Vet, Subh; नो [न] CRC, CPS, Vet.
(*c*) कान्ताकाम° CRC, CPS, Vet.
(*cd*) Different in Subh and Vet. See IS 3836.

Śārdūlavikrīḍita metre.

1659.

नो वान्तरीक्षे न समुद्रमध्ये
न पर्वतानां विवरप्रदेशे ।
नो वा स्वदेशे भुवि किंचिदस्ति
यत्र स्थितं कर्म न बाधते स्वम् ॥

(आ) CPS 139.13.
(*a*) वान्तरक्षे CPS.

Upajāti metre (Indravajrā and Upendravajrā).

1660.

नौधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी लभते पयः ।
एवं राष्ट्रं प्रयोगेण पीड्यमानं न वर्धयेत् ॥

(आ) CRT 4.5. (Variant of No. 191). (Cf. Nos. 462,803,916,1769).
(इ) GP 1.111.5.
(*a*) नोधश्छिन्द्यात्तु GP.
(*d*) वर्जयेत् [व°] GP.

प

1660 A.

पञ्च नश्यन्ति पद्माक्षि क्षुधार्तस्य न संशयः ।
तेजो लज्जा मतिर्मानं महत्त्वं चापि पञ्चमम् ॥

(आ) CNG 275.
(ई) Subh 121, IS 3855.
(*a*) नस्यन्ति Subh.
(*b*) शंसयः Subh.
(*c*) नज्जा Subh.

1661.

पञ्चभिः काम्यते कुन्ती तद्वधूरपि पञ्चभिः ।
सतीं वदति लोकोऽयं यशः पुण्यैरवाप्यते ॥

(आ) CNI I 162. (Partly illegible and reconstructed), CnT II 20.8, CnT III 53.7.
(इ) VCmr 4.20, VCjr 4.2.
(ई) (Cf. SRBh 115.117).
(*a*) कौति (twice) CNI I; all other texts with the exception of VC कामिता; my change to काम्यते, but VCmr पञ्च कामयते कु°.
(*b*) वधूरपि हि तादृशा CNI I (?); तद्वधूरथ CNI; पञ्च तस्या अपि स्नुषा VCmr.
(*c*) तथापि कथिता साध्वी CNI I; वदन्ति तमेव VCmr.

1662.

पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ।
गणिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ॥

(आ) CvŞ 1.10. (Variant of No. 507, where different readings are noted; see above). (Cf. No. 625). (For similar thoughts see No. 93).

1663.

पञ्च वाक्यं च मन्तव्यं पञ्च निन्दति निन्दकः ।
पञ्चभिः कलहो मूर्खः पञ्चभिस्तवितो वरः ॥

(आ) CvGt 7.16 (partly illegible and reconstructed).

(*b*) पंचनिंदति CvGt.

1664.

पञ्चैते मम भर्तारः सुरूपा दृढविक्रमाः ।
तथापि बलवान् कामो मनः षष्ठेऽपि धावति ॥

(आ) CvP IV 1.17, CvP V 1.17, CvLd 1.18, CM 97.

(ई) (Cf. Subh 133, NT 9, IS 7129 and 7582).

(*b*) द्रढलक्रमः CvP V.

(*d*) धारवति CvLd (*contra metrum*).

1665.

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति अज्ञानस्य कुतोऽभयम् ॥

(आ) CNW 34. (Cf. No. 179).

(इ) ŚP 1424, SRBh 153.5, IS 3871.

(*a*) पठता IS.

(*c*) कलहं CNW (var.).

(*d*) न भयं चास्ति जाग्रहः ŚP, SRBh, IS (better).

1666.

पठनाच्च तपस्वी च शूरश्चाप्यकृतव्रणः ।
मद्यपा स्त्री सती चेति राजन्न श्रद्धाम्यहम् ॥

(आ) CRC 7.26, CRT 7.11, CPS 202.71.

(इ) GP 1.114.21.

(*a*) स्थूलवपुस् [प°] CRT; सधनो हि [प°] GP.

(*b*) शूरतो वै कृतश्रमः GP.

(*c*) मध्यमा CRC, CPS; सतीत्येवं GP.

(*d*) श्रद्धा° CRT (*contra metrum*).

1667.

पठन्ति सर्वशास्त्राणि दुर्लभा भावभेदनाः ।
शिरो वहति पुष्पाणि गन्धं जानाति नासिका ॥

(आ) CNN 1 (partly reconstructed).

(ई) (Cf. Subh 282 ⌊IS 7132⌋).
(*a*) सुलभानि (शु°) हि शास्त्राणि Subh.
(*b*) दु... CNN (rest reconstructed); उपदेष्टा तु (गुरूपदेशस्तु) दुर्लभः Subh.
(*d*) गन्ध जानन्ति नासिकाः Subh.

1668.

पठ पुत्र सदा नित्यम् अक्षरं हृदये कुरु ।
स्वदेशे पूज्यते राजा विद्या सर्वत्र पूज्यते ॥

(आ) CNW 92, CNF 22, CNL 38, CNT IV 162, CnT II 11.2, CnT III 7.24, CnT V 40, CnT I 22. (Cf. Nos. 629 and 939).
(ई) IS 3873.
(उ) SRN (T) 43, ShD (T) 135 and 227 and in to-day's Tibetan literature (cf. H. Duncan's Love Songs and Proverbs of Tibet; No. 612).
(*d*) विद्वान् (instead of विद्या) would be better (cf. CN 1).

Cf. Crn. 77.

1669.

पठिते गणिते शिल्पे तथा सर्वगुणेषु च ।
धर्मार्थकाममोक्षेषु सर्वत्र कुशली भवेत् ॥

(आ) CvW 3.6, CvP IV 3.10, CvTb 3.11, CvL II 3.10, CnT II 4.12, CnT III 3.12, CnT VI 50, CM 98.
(ई) (Cf. IS 3122).
(*a*) पविते CvW; पवित CvL II; गुणिते CvTb; गणित CvP IV; शील्पे CvP IV; श्लिपेः CvW.
(*b*) सर्वक्रलसु चः CvW; सर्वकुलेषु CvP IV; सर्वत्रलेषु CvL II.
(*c*) धर्माक्षकम° CvP IV; °मोक्षषुः CvW.
(*d*) कुशेली CvTb.

1670.

पण्डिते चैव मूर्खे च बलवत्यथ दुर्बले ।
ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता ॥

(आ) CVNS 11.23.
(ई) SRBh 158.229.
(*b*) बलवत्यपि दुर्जने SRBh.

1671.

पण्डितो हि वरं शत्रुर् न मूर्खो हितकारकः ।
वानरेण हतो राजा विप्राश्चौरेण रक्षिताः ॥

(*a*) CNN 20. (Cf. Nos 1917-8).
(इ) (Cf. P [Pts 1.417, PP 1.418 and 421]).
(ई) IS 3878, Subh 111. Cf. Weber's *Indische Studien* 3.371.
(*a*) ऽपि [हि] Pts; शत्रु Subh.
(*b*) मा [न] Subh.
(*d*) विप्रचौरेण CNN; रक्षितः CNN (var.).

1672.

पत्यौ जीवति या योषिद् उपवासव्रतं चरेत् ।
आयुः सा हरते भर्तुर् नरके चैव गच्छति ॥

(आ) CNPh 93 *bis*. (Cf. Nos. 1213 and 1637).
(इ) Vi 25.16.
(*a*) नारी [यो°] CNPh.
(*b*) उपोष्यव्रत चारिणी CNPh.
(*c*) आयुष्यं CNPh.
(*d*) नरकं CNPh.

1673.

पत्यौ भक्तिर्व्रतं स्त्रीणाम् अद्रोहो मन्त्रिणां व्रतम् ।
प्रजानां पालनं राज्ञां व्रतं शीलं महात्मनाम् ॥

(आ) CRP 1.34, CRBh I 1.34, CRBh II 1.36.
(इ) RT 2.48 *ab*.
(ई) IS 3901 *ab*.
(*a*) भक्तिव्रतं RT (Troyer's ed.).
(*b*) अद्रोहे CRP; मन्त्रिणं CRP; नृपे [व्र°] CRBh I, CRP.
(*cd*) प्रजानुपालनंऽनन्यकर्मता भूभृतां व्रतम् RT.
(*c*) प्रजानुपालनं राज्ञा CRBh II.
(*d*) व्रतं CRBh I.

Cf. Crn. 35.

1674.

पदे पदे च रत्नानि योजने रसकूपिका ।
भाग्यहीना न पश्यन्ति बहुरत्ना वसुंधरा ॥

(इ) (Cf. Śto 319 15-6)
(ई) In SRBh 160.311 ascribed to CV (?) 2.1, IS 3908, Subh 116.
(*a*) निधानानि [च र°] Subh.
(*c*) °हिनाः Subh.
(*d*) °धराः Subh.

1675.

पदे स्थितस्य मित्रा ये ते तस्य रिपुतां गताः ।
भानोः पद्मे जले प्रीतिः स्थलोद्धरणशोषणः ॥

(इ) GP 1.115.72.
(*a*) ये पदस्थस्य मित्राणि GP in "The Purāṇic Anthology" ed. by A. P. Karmarkar, Thalakwadi, Belgaum, 1955.

1676.

पन्थान इव विप्रेन्द्र सर्वसाधारणाः श्रियः ।
मदीया इति मत्वा वै न हि हर्षयुतो भवेत् ॥

(इ) GP 1.114.74.
(*cd*) तस्मात्त्वं नान्ववद्येथा नास्तीत्यभत्रनाश्च ताः GPy.
(*d*) भव GP.

1677.

परपत्नी तु या स्त्री स्याद् असंबद्धा च योनितः ।
तां ब्रूयाद् भवतीत्येवं सुभगे भगिनीति च ॥

(आ) CVNS 12.12.
(इ) Mn 2.129.
(ई) VīrS 467.2-3, Parāśara-dharma-saṁhitā 1.1; 325.10-1, Smṛti-candrikā 38.11, Smṛtimuktāphalam 110.20, Bālambhaṭṭīya-Brahmacārī-prakaraṇa 148.19.

(*a*) च [तु] some MSs in Mn (cf. JSAIL 27.4).

(*b*) ऽसंबंधा CVNS; असंबन्धा some Mn texts and *nibandha-s* (cf. JSAIL 27.4); जातितः [यो°] CVNS.

(*c*) एव Smṛti-candrikā.

(*d*) भागिनी तु वा Smṛti-candrikā; वा [च] Mn (Jhā's ed.), Smṛti-muktāphalam.

This maxim was probably incorporated in CVNS from Mn.

Cf. JSAIL 27.4.

1678.

परप्राणैर्निजप्राणान् सर्वे रक्षन्ति जन्तवः ।
निजप्राणैः परप्राणान् एको जीमूतवाहनः ॥

(आ) CNP II 260.

(इ) Vet 15.12 and *e* in Vet *ad* 3.26.

(ई) IS 3932, Subh 116.

(*a*) निजप्राणाः Subh.

(*c*) नरप्राणे परप्राणः CNP II; परप्राणा Subh.

(*d*) विरलः कोपि रक्षति Vet *ad* 3.26.

1679.

परान्नेन मुखं दग्धं हस्तौ दग्धौ प्रतिग्रहात् ।
परस्त्रीभिर्मनो दग्धं कुतः शापः कलौ युगे ॥

(ई) In SRBh 98.3 ascribed to CV (?) 4.23.

1680.

परिशुद्धामपि वृत्तिं
समाश्रितो दुर्जनः परान् व्यथते ।
पवनाशिनोऽपि भुजगाः
परोपतापं न मुञ्चन्ति ॥

(आ) CNI I 327.

(ई) ŚP 355, SV 400, SkV 1269, SRBh 57.130, SRK 27.62, IS 155.

(*a*) अतिशु° Böhtlingk's change; अति° [अपि] IS.

(*b*) व्यथयेत् Böhtligk's change; व्यथयते IS.

(*c*) पवनाशनो CNI I.
(*d*) पश्चात्तं न मुञ्चति CNI I; परोपघातं SkV; परपरितपं SRK.

Āryā metre.

1681.

परिहर मनसा सुवर्णचिन्तां
कुरु हरिपूजनमेव सारम् ।
यमभटकरपतितानां नराणां
भवति न हेमशतैः क्षणं विमुक्तिः ॥

(आ) CRC 6.84, CPS 158.65.

Puṣpitāgrā metre (corrupt in *b* and *c*).

1682.

परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥

(आ) CvTb 7.11, CRT 8.62.
(इ) PtsK 1.88.
(ई) IS 3969, Subh 138.
(*ab*) प° ना° tr. CvTb, Subh.
(*b*) नार्धान्ति Subh; समुद्रतानि CRT.
(*c*) आभीरघोषे IS; °कान्तिस् CvTb.
(*d*) °वराटैः वि° PtsK; °वराटैः प्रवदन्ति गोपा CvTb, कपर्दिकाभिः प्रवदन्ति Subh.

Upajāti metre (Upendravajrā and Indravajrā).

1683.

परुषेणापि चोक्ता या दृष्टा वा क्रुद्धचक्षुषा ।
सुप्रसन्नमुखी भर्तुः सा नारी धर्मभागिणी ॥

(आ) CNB 122.
(इ) H (HJ 3.27, HS 3.25, HM 3.25, HK 3.25, HP 3.25, HN 3.25, HH 78.23-4, HC 104.9-10).

(ई) IS 3972.
(*a*) परुसं चापि चोक्त्वा CNB; परुषाण्यपि या प्रोक्ता H.
(*b*) या [वा] IS; क्रोध° H.
(*c*) या° [सु°] IS; °मुखा IS.
(*d*) °भागिनी HJ; °भाजनम् IS.

1684.

परेण चिन्तितो मन्त्रो दैवेन च निवारितः ।
साधुपथस्थितो राजा भगवान् दैवक्रियथा ॥

(आ) CNPN 101, CM 103.
(*a*) or नरेण (text).
(*c*) °पथान्ति CNPN (MS).
(*d*) दैवकी CNPN (MS).
Cf. Crn 20.

1685.

परेषु या स्थिता विद्या पाण्डित्यं वा परेषु यत् ।
न जानाति परवासं भुवि परवशः क्लेशः ॥

(आ) CRT 8.52.

1686.

परोक्तमात्रं यस्तथ्यं मन्यते बुद्धिवर्जितः ।
हसनीयः परेषां स शाखारूढो जटी यथा ॥

(आ) In SRBh 381. 172 ascribed to CV (?) 4. 49.
(ई) IS 3978 (Bharaṭakadvātrṁśikā).

1687.

परोक्षे देवताः सर्वा राजा प्रत्यक्षदेवता ।
प्रसादस्य प्रकोपस्य प्रत्यक्षे दृश्यते फलम् ॥

(आ) CNP II 249, CNT IV 238, CM 104.
(*a*) सर्वे CNP II.
(*b*) °देवता: CNP II.
(*c*) प्रमादं च प्रकोपं च CNP II.

1688.

परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै ।
विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते ॥

(आ) CVNS 11.24.

(ई) SRBh 156.159.

1689.

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वयमनुष्ठानं कस्यचित्तु महात्मनः ॥

(आ) CNT IV 139.

(इ) H (HJ 1. 108, HS 1. 98, HM 1.102, HP 1. 76, HN 1. 78, HK 1. 104, HH 22. 7-8, HC 30. 3-4).

(ई) SRBh 45 26, IS 3987, SRK 18. 69, Kk 96.

(*b*) सु° नृ° tr. in some H texts; भवेत् [नृ°] HJ.

(*c*) स्वीयम् HM, HK, HC, SRBh, SRK.

(*d*) सु [तु] P in HS, SRBh, SRK.

Cf. JSAIL 24.31.

1690.

पर्जन्य इव भूतानाम् आधारः पृथिवीपतिः ।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥

(आ) CRT 3. 23.

(इ) H (HJ 1. 217, HS 1. 195, HM 1. 200, HK 1.202, HP 1. 161, HN 1. 162, HH 36. 6, HC 48. 8-9), PrC 4. 194, Purātana Prabandha-saṁgraha 396.

(ई) ŚP 1283, SRBh 142. 4, SRK 122. 2, SRHt 61.5, IS 3990. (Cf KN 5.59).

(*a*) पर्यन्य IS.

1691.

पर्जन्यमार्यैः सह वर्धमानं
क्रमात् पताकेव भवत्यवश्यम् ।
तदेव दुष्टैः सह हीयमानं
क्रमाद् भवेज्जीर्णपटोपमानम् ॥

(आ) CRB 7.61, CRP 7. 60, CRBh I 59.

(*a*) शुजर्यम् CRB; अजर्यम [प°] CRBh I (better).

(*c*) नीहीमानं CRP.

(*d*) भवेद् रीपुटो !° CRB,CRP.

Upajāti metre (Indravajrā and Upendravajrā).

1692.

पश्य धर्मस्य माहात्म्यं क्रियमाणस्य नित्यशः ।
आत्मनः कुरुते श्रेयो लोकस्य भवति प्रियः ॥

(आ) CRC 6.53,CRBh II 6.45, CPS 149.40.

1693.

पापं कुर्वन् पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन् पुण्यकीर्तिर् अत्यन्तं पुण्यमश्नुते ॥

(आ) CVNS 12. 18.

(इ) MBh (MBh ⌊Bh⌋ 5. 35.51, MBh ⌊R⌋ 5.34.61, MBh ⌊C⌋ 5. 1241-2).

(ई) BrDh 2.14.13.

(*c*) पुण्यकु° CVNS.

(*d*) पुण्यमे वाश्नुते फलम् MBh; पुण्यं अत्यन्तमश्नुते MBh (R), MBh (C), BrDh.

This maxim was probably incorporated in CVNS from MBh.

Cf. JSAIL 30.51.

1694.

पापेऽप्यपापः परुषे ऽप्यभिधत्ते प्रियाणि यः ।
मैत्रीद्रवान्तःकरणस् तस्य स्वर्ग इहैव हि ॥

(आ) CNŚ A 5, CPS 355. 5.

1695.

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस् तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥

(आ) CVNS 14.13.
(इ) Mn 3.55.
(ई) PDhS 1.2; 111.16-7, SC 243.9, SMPh 143.23, BVP 230.21 (*cd* only), Vyavahārārthasamuccaya 121.
(*c*) पोषयितव्याश्च PDhS (var.).

This maxim was probably incorporated in CVNS from Mn.

Cf. JSAIL 27.10.

1696.

पितृमातृमयो बाल्ये यौवने दयितामयः ।
पुत्रपौत्रमयः पश्चात् मूढो नात्ममयः क्वचित् ॥

(आ) CNP II 98.
(ई) IS 4075, Subh 27.
(*a*) वान्ये Subh.
(*b*) वनिता° [द°] CNP II.
(*c*) तदपत्यंययो वार्ये Subh (changed by O. Böhtlingk to तदपत्यमयो वार्ध्ये).
(*d*) मूढा आत्म° CNP II (MS) (*sic !*); नामयः Subh.

1697.

पुनर्ग्रामाः पुनः क्षेत्रं पुनर्वित्तं पुनर्गृहम् ।
पुनः शुभाशुभं कर्म न शरीरं पुनः पुनः ॥

(आ) CRB 2.6. (Cf. Nos. 671,672,1698-9).
(इ) (Cf. VCSr 20.1, VCjr 20.2, Śto 321.10-1, SR 385,339).

1698.

पुनर्दाराः पुनर्वित्तं पुनः क्षेत्रं पुनः पुनः ।
पुनः शुभाशुभं कर्म शरीरं न पुनः पुनः ॥

(आ) (Cf. Nos. 671,672,1697,1699).

(इ) VCsr 20.1, VCjr 20.2, Śto 321.10·1.
(ई) In SRBh 385.339 (ascribed to Vṛddha Cāṇakya). IS 4124.
(*a*) दारा NdJ in VCjr; जाया T in VCjr; जाता: M in VCjr; चिन्ता [वि°] H in VCjr; मित्रं [वि°] Śto. RF in VCjr.
(*b*) तथैव च [पु° पु°] J in VCjr; सुता: [पु° second] VCsr (V in VCsr as above), VCjr (Ś in VCjr as above), Śto; सुतः [पु° second] Q in VCsr; धनम् [पु° second] RF in VCjr.
(*c*) शुभाः शुभं B in Śto; श्रेयस्करं VCjr; श्रेयादिकं GAHF in VCjr; यागदिकं O in VCjr.
(*d*) श° न tr. Śto. N in VCsr, F in VCjr; नः J in VCsr.

1699.

पुनर्दाराः पुनर्वित्तं पुनर्मित्रं पुनः सुताः ।
पुनरत्र प्रधानत्वं न शरीरं पुनः पुनः ॥

(आ) CNP II 141, CM 106. (Cf. Nos. 671, 672, 1697,1698).
(इ) VCsr 20.1, VCjr 20.2. (Cf. Śto 321.10-1).
(ई) SRBh 385.339, IS 4124.
(*a*) जाया [दा°] T in VCsr; दारा NdJ in VCsr; दावा CNP II; मित्रं [वि°] RF in VCjr.
(*b*) पुनः क्षेत्रं VCsr, VCjr, SRBh; तथैव च [पु° सु°] J in VCsr ; सुतः VCjr, CM, Q in VCsr, CM; सुतं CNP II; पुनः [सु°] V in VCsr, Ś in VCjr, SRBh; धनं RF in VCjr.
(*c*) पुनः शुभाशुभं कर्म VCsr, SRBh; यागादिकं O in VCjr.
(*d*) श° न° tr. VCsr, F in VCjr, SRBh.

Cf. Crn. 104.

1700.

पुरंदरसहस्राणि चक्रवर्तिशतानि च ।
निर्वापितानि कालेन प्रदीपा इव वायुना ॥

(आ) CRC 6.78, CPS 158.67.
(ई) ŚP 4163, SV 3309, RJ 1382, SRBh 373.190, IS 4135, Subh 82.
(*c*) प्रवासितानि CRC, CPS.
(*d*) प्रदीप CRC, CPS.

1701.

पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरैः ।
युद्धे विजयसंदेहः प्रधानपुरुषक्षयः ॥

(आ) CNP II 204, CNT IV 229, CM 107.
(इ) PM 1.129.
(ई) ŚP 1298.
(*b*) °शितायुधैः PM.
(*c*) रण [युº] ŚP; °देहो CNP II (MS).

1702.

पूगीफलानि पत्राणि राजहंसास् तुरंगमाः ।
स्थानभ्रष्टाः सुशोभन्ते सिंहाः सत्पुरुषा गजाः ॥

(आ) CvA 8.19, CvṢ 8.19 (*d* corrupt), CNP II 201, CNI I 206, CNT IV 226, CnT II 19.4, CnT III 8.10. (Cf. No. 1880).
(इ) PM 2.42.
(ई) SuM B after 22, IS 4157, Subh 135 and 219.
(*a*) पुगीफलसु CNI I; °फलति Subh.
(*b*) राजहंसस् (°स SuM) Subh, SuM; °गमा CvA.
(*c*) °भ्रष्टा SuM, Subh.
(*d*) दान्ताः केशा नखा नराः SuM; सिंहा CNI; हंसः [सिº] Subh; सत्पुरुषाः Subh.

1703.

पूर्वं पश्चाच्चरन्त्यार्ये सदैव बहुसम्पदः ।
विपरीतमनार्ये च यथेच्छासि तथाऽऽचर ॥

(इ) GP 1.114.53.
(*a*) पश्चाच्चरेदार्ये GPy.
(*c*) विपरीतमनार्येषु GPy.

1704.

पूर्वं यैर्न कृतं सुतीर्थमरणं विप्रा न संतर्पिता
हव्यं नैव हुतं हुताशनमुखे नाराधितः शङ्करः ।
दत्तं नैव हिरण्यमन्नवसनं गावस्तिला मेदिनी
ते तिष्ठन्ति कुचेलभक्तविधिना नित्यं नरा दुःखिताः ॥

(आ) CRC 8.33, CPS 227. 20.

(*d*) भक्तनिधना CPS (better); दुखिता: CRC.

Śārdūlavikrīḍita metre.

1705.

पूर्वजन्मार्जिता विद्या पूर्वजन्मार्जितं धनम् ।
पूर्वजन्मार्जितं पुण्यम् अग्रे धावति धावति ॥

(आ) CNW 15.(Cf. No. 1706).

(ई) IS 4173.

1706.

पूर्वदेहेषु या विद्या पूर्वदेहेषु यद् धनम् ।
पूर्वदेहेषु यत्पुण्यम् अग्रे तिष्ठति तिष्ठति ॥

(आ) CNP II 245, CM 108. (Cf. CNT IV 259). (Cf. No 1705).

(*a*) पूर्वदत्तेषु CNP II.

(*b*) पूर्वदत्तेषु CNP II.

(*c*) पूर्वदत्तेषु CNP II; य कंन्या CNP II.

1707.

पूर्वाभिगमने लक्ष्मीर् आयुर्वृद्धिश्च दक्षिणे ।
पश्चिमे प्रबला चिन्ता मुक्तिमोक्षं तथोत्तरे ॥

(आ) CNPN 79, CM 109.

1708.

पृथ्वीगुरुतरं नास्ति मनःशौचपरं नहि ।
तृणस्वल्पतरं नैव वायुःशीघ्रतरं नहि ॥

(आ) CNP II 100, CM 112.

(*b*) °शौचं CNP II (MS).

(*c*) तृणः CNP II (MS); चैव [नै°] CNP II (MS).

(*d*) °शीर्घ° CNP II (MS).

1709.

प्रथमे कृषिवाणिज्यं द्वितीये चाश्वपोषणम् ।
तृतीये क्रयविक्रयौ चतुर्थे राजसेवनम् ॥

(आ) CNP II 3, CM 114. (Cf. Nos 489 and 1929).

(*a*) कृषिवाणिज्य CNP II (MS).

(*b*) °पोपणम् CNP II (MS).

(*c*) °कं च CNP II (MS).

(*d*) राज्यसे° CNP II (MS).

Cf. Crn. 171.

1710.

प्रथमे भिक्षुका यान्ति द्वितीये नटनर्तकाः ।
तृतीये साधवो यान्ति चतुर्थे कृषकास् तथा ॥

(आ) CNPN 80, CM 80.

(*b*) E. Monseur changed rightly °नायिका to °नर्तकाः (so also above).

(*c*) E. Monseur changed also rightly माधवा to साधवो (so also above).

1711.

प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी ज्ञेया चतुर्थेऽहनि शुध्यति ॥

(आ) CNP II 229, CnT II 23.7, CnT III 57.1, CM 116.

(इ) Vet 1.12.

(*a*) चाह्वि *b* in Vet.

(*b*) °घामिनी CNP II; °घातकी B in Vet.

(*c*) प्रोक्ता [ज्ञे°] Vet (b in Vet as above).

(*d*) शुध्यते *A* in Vet.

1712.

प्रपद्य चञ्चलां लक्ष्मीं यः करोति न सञ्चयम् ।
धनानां चैव वस्त्राणां मूषकः स इति स्मृतः ॥

(आ) CRC 8. 162, CPS 345.34.

(*a*) विपुलां [च°] CPS.

(*b*) सद्व्ययम् CPS.

1713.

प्रभुर्विवेकी प्रमदा सुशीला
तुरंगमः शस्त्रनिपातधीरः ।
विद्वान् विरागी धनिको प्रदायी
पञ्चैव रत्नानि भवन्ति लोके ॥

(आ) CNPh 163*.

(*c*) विद्वानु° (or विद्यानु°) CNPh.

Upajāti metre (Upendravajrā and Indravajrā).

*In SRBh 173. 851, there is a similar maxim which reads.

*प्रभुर्विवेकी धनवांश्च दाता
विद्वान् विरागी प्रमदा सुशीला ।
तुरंगमः शस्त्रनिपातधीरो
भूमण्डलस्याभरणानि पञ्च ॥

The latter maxim reads better.

1714.

प्रभूतमलगन्धेन स्रवता मूत्रशोणितम् ।
दुष्टान्धवित्तं तेनैवं प्राणिनान्धीकृतं जगत् ॥

(आ) CNP II 178, CM 117.

(*a*) °मलं CNP II (MS).

(*b*) श्रव° CNP II.

(*c*) °वित्त CNP II (MS); दुष्टतान्धचित्तेनैवं E. Monseur in CM.

(*d*) °नान्धा° CNP II (MS).

1715.

प्रलिम्पन्निव चेतांसि दृष्ट्या साधु पिबन्निव ।
स्रवन्निवामृतं साधु प्रयुञ्जीत प्रियं वचः ॥

(ई) In SRHt 152.3 ascribed to C.

1716.

प्रविचार्योत्तरं देयं सहसा न वदेत् क्वचित् ।
शत्रोरपि गुणा ग्राह्या दोषास्त्याज्या गुरोरपि ॥

(आ) CNŚC 102, CNŚl 102, CNŚ 96, CNŚL 58, CNŚPK 76. CPS 367.45.

(*b*) वदेन CNŚPK.

1717.

प्रसन्नचित्तः स्वयमेव तुष्यति
प्रभुः शिवश्चार्द्रदलप्रपूजनात् ।
न कोटिसौवर्णकुशेशयार्चनात्
अशुद्धबुद्धिः शरदां शतैरपि ॥

(आ) CRC 6.43, CRBh II 6.31, CPS 162.78.

(*a*) °चित्तस्य सदैव तु° CRBh II.

(*b*) शिवः साद्रलमूलपू° CRBh II.

(*d*) दणुद्धवुद्धेशरदाशतै° CRBh II.

Vaṁśastha metre.

1718.

प्रस्वेदमलसांश्लिष्टा निरालम्बा निराश्रयाः ।
द्वारि तिष्ठन्ति देवेश सेवका वृषणा इव ॥

(आ) CNT IV 166.

(इ) Vet 4.2.

(ई) IS 4290 (cf. SV 3342).

(*a*) प्रस्वेदाढ्या मलक्लिन्ना *b* in Vet; °संक्लिष्टा Vet; °संक्लिन्ना *e* in Vet; °संपृष्ट्वा *c* in Vet; °संपूर्णा *d* in Vet.

(*c*) द्वारे Vet (*c* in Vet as above); द्वारभूमौ स्थिता देव *b* in Vet; देवस्य *c* in Vet; भो देव A in Vet; ते देव *ae* in Vet; पूषाणां *d* in Vet.

(*d*) °भरणा इव *d* in Vet.

1719.

प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद् वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥

(आ) CNG 255.

(इ) MBh (MBh ⌊Bh⌋ 1.69.10, MBh ⌊R⌋ 1.74.90, MBh ⌊C⌋ 1.3078).

(ई) IS 4923. (Cf. ŚP 417, SRBh 39.3, SRK 36.23).

This maxim was probably included in the CNG text from MBh, but the compiler wrongly omitted the preceding stanza of MBh with which it is closely connected.

Cf. JSAIL 30.6.

1720.

प्रातःकाले च संध्यायां नृपेण पठितं यदि ।
राज्यं परिजना नित्यं वर्धन्ते नास्ति संशयः ॥

(आ) CRT 8.71. (Cf. No. 1894).

(*a*) सन्ध्यायां CRT.

1721.

प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया ।
तृप्ताः कामेन बाध्यन्ते निद्रया निशि जन्तवः ॥

(आ) CRC 6.77, CPS 168.96.

(ई) SV 3336, SRK 296.19, SRBh 367.19, IS 4319, Subh 270.

(उ) SS (OJ) 402.

(*b*) °सयोः CRC, CPS.

(*c*) दोषा [तृ°] Subh (IS); तृष्णा SRK.

(*d*) ज° निशि नि° tr. SV; प्रणिनो निशि निद्रया SRBh, Subh, SRK.

1722.

प्राप्तव्यान्येव प्राप्नोति गन्तव्यान्येव गच्छति ।
लब्धव्यान्येव लभते दुःखानि च सुखानि च ॥

(आ) CNM 52.

(इ) R(R ⌊B⌋ 7.54.16, R ⌊R⌋ 7.54.16-7).

(ई) SRHt 54.43, IS 4321.

(*a*) °व्यानेव CNM.

(*b*) °व्यानेव CNM.

(*c*) °व्यानेव CNM.

(*d*) सुषानि CNM.

Cf. JSAIL 31.11.

1723.

प्राप्ताः श्रियः सकलकामदुघास् ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
संतर्पिताः प्रणयिनो विभवैस् ततः किं
कल्पं स्थितं तनुभृतां तनुभिस् ततः किम् ॥

(आ) CRC 8.71, CPS 266.9.

(इ) BhŚ 186, VCjr 7.2 *ab/dc*.

(ई) Kāvyaprakāśa (Bhandarkar ed.) 271 (p. 393), Kāvyapradīpa (KM 24) *ad* 7.9 (p. 241), Daśarūpāvaloka *ad* 4.9, KH 226, AA 67, Can 26, Alaṁkāramahodadhi (GOS 95) 404 (p. 158), Rasaratnahāra 134, Rasaratnapradīpikā f. 24, ŚP 4112, SV 3451, SRBh 176.949, IS 4327, Śāntiś 4.2, Śatakāvali 105, NS 81.

(*a*) लब्धा [प्रा°] IS; प्राप्तश्रियः J_3 in BhŚ; श्रियं G_1 in BhŚ; श्रयः M_2 in BhŚ; शकल° B_2 in BhŚ; °कामदुघास् BhŚ (C in BhŚ as above), VCjr (Ś in VCjr as above), Kāvyapradīpa, Alaṁ°, ŚP, IS (but °दुघा IS; काम्यदु° J_{1t} in BhŚ; दुघां G_1 M_2 in BhŚ).

(*b*) न्यस्तं [द°] B F_3 HJ_1 S in BhŚ, ŚF; सिरसि IS; सकल° [शि°] F_2 in BhŚ; च द्वि° H in VCjr.

(*c*) चेद्धर्मसाधनविधौ न रतोयं आत्मा (मनुष्यः K in VCjr) VCjr; सन्तर्पितः CPS; सन्मानिताः (°ता IS, °दिताः IS, BhŚ; °तर्पिताः CJ; °प्रीणिताः D; °पादिताः $WY_{3,5,7,8}$ $TG_5M_{1:3}$; °तोषिताः XY_1; °भाविताः $Y_6G_{1,3}t_{1,3}M_2$,) BhŚ, Kāvyapradīpa, ŚP; विभवास् IS.

(*d*) कल्पस्थितास्तनुभृतस्तनवस् त° IS; कल्पस्थितास्तनुभृतनुभिस् °त IS; कल्पं स्थितं तनुभृतां तनवस्ततः IS; कल्पैः CX_2 in BhŚ; कल्प° DF_{1-3} $IJW_{2-4}X_1Y_{1\ 2\cdot4\cdot8}$ $TG_{1,3t15}$ M_1 in BhŚ; °स्थितास् WX_2 $Y_{1\cdot2,6-8}$ $TG_{1,3t}$ M in BhŚ; °स्थितिस् CRC, CPS; °स्थितां $XG_{1,3}$ in BhŚ; °स्थिरं G_5 in BhŚ; तनुभृतस् W in BhŚ; तनवस् $WXY_{1\cdot2,4\cdot8}$ $TG_{1\cdot4,5}$ $M_{1\cdot,2,4,5}$ in BhŚ; असवस् [°त] M_3 in BhŚ.

Vasantatilakā metre.

1724.

प्राप्ते भये परित्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥

(आ) CvL I 8.33. (Variant of Nos. 150 and 1003).

(इ) P (Pts 2.179, PtsK 2.194 and 2.59 *cd*/*ab*, PP 2.195).
(ई) SRBh 390.526, IS 4328.
(*a*) शोकारतिभयत्राणां PP; आपदां च प° PtsK 2.59; भयत्रीणं CvL I.
(*b*) शोकसंतापभेषजं PtsK 2.59.
(*c*) केनामृतम् PtsK 2.59; किन CvL I; श्रेष्ठ [सृ°] CvL I; सर्वं inserted after इदं *psi* in PP.

1725.

प्राप्य चलानधिकाराञ्
शत्रुषु मित्रेषु बन्धुवर्गेषु ।
नापकृतं नोपकृतं
न सत्कृतं किं कृतं तेन ॥

(आ) CvL I 8.41.
(ई) SRBh 170.740.
(*a*) चाला° CvL I (*contra metrum*); °रान् CvL I.
(*b*) शत्रु (°षु om.) CvL I; बन्ध° CvL I.
(*c*) नायकृतं CvL I.
(*d*) सन्कृतं CvL I.

Ārya metre.

1726.

प्रियान्न संभवेद् दुःखम् अप्रियान्नाधिकं भयम् ।
ताभ्यां हि ये वियुज्यन्ते नमस् तेषां महात्मनाम् ॥

(आ) CVNS 11.20.
(इ) R (R ⌊B⌋ 5.26.50-1, R ⌊R⌋ 5.26.48)
(*a*) दुखम् CVNS.
(*b*) अप्रियादधिक CVNS; भवेद् [भ°] R (B).
(*c*) वियुज्यते CVNS.

This maxim was probably incorporated in the C text from R.

Cf. JSAIL 31.17.

1727.

प्रिये प्रियो भवेन् नृपस् चपले चपलस् तथा ।
सारल्ये सरलं कुर्यात् शठे शाठ्यं समाचरेत् ॥

(आ) CRT 4.11.

1728.

प्रीतिः सर्वत्र कर्तव्या स्वपक्षेषु विशेषतः ।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥

(आ) CvP IV 4.15. (Cf. Nos. 1025 and 2014).
(इ) Cf. H (HJ 1.36, PtsK 3.55).
(c) परभ्रष्टा CvP IV.

फ

1729.

फलकाले यथा वृक्षः सेव्यते बहुपक्षिभिः ।
गुणजातिविहीनोऽपि कार्यात् संसेव्यते नरैः ॥

(आ) CNI I 199, CnT II 29. 1, CnT VII 75.

(ई) SuM 23.52.

(*a*) वृक्षा CNI I.

(*b*) सेव्यन्ते CNI; °पक्षिभि CNI.

(*c*) गुणाज्ञानविहीनाऽपी CNI I.

(*d*) सेव्यन्ते कातरैर्नारैः CNI I.

1730.

फलार्थी फलिनं वृक्षं यच्छिन्द्याद् दुर्मतिर्नरः ।
न च्छिन्द्यात् तस्य तन्मूलं महान्तं दोषमाप्नुयात् ॥

(आ) CRCa II 45.

(इ) GP 1. 114.20.

(*a*) फलित CRCa II.

(*b*) यश्छिद्या CRCa II; °तिनरः CRCa II.

(*c*) नोद्छिद्यात् CRCa II; निष्फलं [न°] GP (GPy as above); वै कार्यं [त°] GP (GPy as above).

(*d*) My change : महातं CRCa II; महतो GPy; तन्मूलं दो° GP.

ब

1731.

वहवो न विरोद्धव्या दुर्जयो हि महाजनः ।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥

(आ) CNI I 209.
(इ) P (PtsK 3. 123, PP 3.109, PM 3.45), MKS 10.
(ई) SuM 23. 51,IS 4418.
(*b*) दुर्जजया PtsK; दुःसहो SuM; दुर्जनो Pr in PP; °जनः CNI I, SuM.
(*d*) भक्षयति M in PP.

1732.

वहवो यत्र नेतारः सर्वे पण्डितमानिनः ।
सर्वे महत्त्वमिच्छन्ति तद् वृन्दमवसीदति ॥

(आ) CNI I 117.
(ई) SV 2724, SRHt 196. 108, IS 4419, Subh 90.
(*b*) पण्डिमानिनः IS (printer's error); पडित° CNI I,
(*c*) प्रभुत्वमाप्नोति CNI I.
(*d*) नित्यंतेप्यव° CNI I; तद्वन्द° Subh; तद्राष्ट्र° Böhtlingk in IS.

1733.

बहूनामप्यसाराणां समवायो हि दुःसहः ।
तृणैरावेष्टयते रज्जुस् तया हस्त्यपि बध्यते ॥

(आ) CRC 7. 85, CRB 7.80, CRBh II 7.37, CPS 184. 24. (Cf. No.713),
(इ) GP 1. 114.66, P (PP 1. 334, Pts 1. 331, PtsK 1. 376), (cf. HJ 1.35) BhPr 145.
(ई) ŚP 1326, SV 2742, SRHt 193. 72, SRBh 83.3, (cf, 144.83), JS 403. 9 and 144. 84 *ab*, IS 4425, Subh 172.
(उ) LN (P) 132, DhN (P) 159, NKy (B) 217.
(*a*) अल्पसा° CRBh II, BhPr, GP, SV, SRHt.

(*b*) संयोगः कार्यसाधकः IS; समुदायो GP, PP (N in PP as above), SRBh; °यः सुदुर्जयः Bh in PP; बलावः [हि दुः°] PtsK, Pañc, Hamb, MS; हि दुज्ज्यः bhN in PP; जयावहः [हि द्वः°] PP; दारुणम् (°णः ŚP, SRBh) GP, ŚP, JS, SRHt, SRBh; दुर्जयः Pts.

(*c*) आविष्कृता CRC, CPS; आवेष्टता GP; आविधीयते ŚP; आरभ्यते IS; रज्जुः CRBh II; रज्जु BhPr, SRBh 83. 3.

(*d*) तथा CRBh II, CPS, GP; यया Pts, JS, SRHt; तया PP, SV, SRBh; येन PtsK; बध्नंति कुञ्जरान् CRBh II; बध्यन्ते दन्तिनश्च तै. ŚP; नागोऽपि GP, PP, Pts, PtsK, JS, SRHt, SV; नागो हि SRBh.

(*cd*) तृणैः संजायते रज्जु वन्ध्यते येन दन्तिनः IS; तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः IS.

Cf. Crn 139.

1734.

बालसखित्वमकारणहास्यं
स्त्रीषु विवादमसज्जनसेवा ।
गर्दभयानमसंस्कृतवाणी
षट्सु नरो लघुतामुपयाति ॥

(आ) CNM 122, CNMN 89.

(इ) Vet 8.7.

(ई) SRBh 174. 895, IS 4434, Subh 119.

(*a*) बालसखित्वम् CNM; °हास्य CNM.

(*c*) रासभया° *a* in Vet; °भाजानुम् CNM; °वाक्यं Subh; °वाक्ता *c* in Vet.

(*d*) न° om. CNM.

Dodhaka metre.

1735.

बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥

(आ) CVNS 10. 23.

(इ) P (PP 1. 331, Pts 1.328, PtsK 1. 372).

(ई) ŚP 282, SRBh 78.1, SRK 49.1, IS 4437.

(*a*) पदा CVNS.

(*d*) कुत्रो° Pr in PP.

1736.

बालातपं प्रेतधूमं स्त्रीं वृद्धां तरुणं दधि ।
आयुष्कामो न सेवेत तथा सम्मार्जनीरजः ॥

(आ) CRCa II 54.
(ई) GP 1.114.40.
(*a*) बालातप CRCa II.
(*b*) पच्छलं [त°] CRCa II.
(*c*) आयुकामो CRCa II.

1737.

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥

(आ) CVNS 16. 21.
(इ) Mn 7.8, MBh (Bh) 12. 68. 40, H (HJ 2. 81, HS 2.80, HM 2. 82, HP 2. 74, HN 2.73, HK 2.82, HH 52.8-9, HC 68. 15-6).
(ई) Nitiprakāśika 8.5, PDhS 1.1; 448. 7-8 and 3.1; 4.1-2, VīrR 17.21-2, RRK 68.16-7, SRBh 142.8, SRHt 62.23, IS 4446.
(*a*) न हि जात्ववमन्त° MBh; नावमंत° CVNS.
(*b*) मनुष्यैरिति MBh; भूपतिः HP.
(*c*) ह्येता *gh* in RRK; पूज्या [ह्ये°] P in HP.
(*d*) ऽनन्तरूपेण B in PDhS 3.1.

This maxin was probably incorporated in the CVNS text from Mn. Cf. JSAIL 24. 1 and 27. 12, Crn 246.

1738.

बालो युवा च वृद्धश्च यत् करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ॥

(आ) CRCa II 35.
(इ) MBh (MBh [Bh] 12. 174. 15, MBh [R] 12. 181. 15 and 12. 322. 55, MBh [C] 12. 6759 and 12.12152), GP 1. 113.29.
(ई) IS 4447.
(उ) SS (OJ) 361, Ślt (OJ) 35.

(*a*) वा [च] MBh (R) 12.322.15.

(*b*) यः GP.

(*d*) तत् फलं प्रतिपद्यते MBh (R) 12. 181. 15, MBh (C) 12. 6759; भुङ्क्ते CRCa II.

This maxim was probably incorporated in the C text from MBh.

Cf. JSAIL 30. 139.

1739.

बालो वा यदि वा वृद्धो युवा च गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥

(आ) CNPh 137.

(इ) H (HJ 1.62, HS 1. 54, HM 1. 106, HK 1.108, HP 1. 79, HN 1.81, HH 15.25-6).

(ई) IS 4448.

(*b*) वा [च] Hit.

(*d*) सर्वत्रा HS.

1740.

बीजं पिता क्षेत्रमहो जनित्री
वर्षाणि कर्माणि शुभाशुभानि ।
भूतानि पश्य प्रतितानि लोके
जातानि यातानि च तानि तानि ॥

(आ) CRC 6.72, CPS 166. 90.

Indravajrā metre.

1741.

बुद्धिः पौरुषमार्जवं गुणरतिर्विद्या कुलं सेवनं
कालेऽस्मिन् विकलत्वमेव सकलं ह्येतत् पुरः स्वामिनाम् ।
यो दोषं कुरुते परस्य मुखरं धीरस्य यो रोधको
यः पापद्रविणस्य वर्धनकरस्तेषां भवेत् स प्रियः ॥

(आ) CRC 8.3, CSBh II 8.9-10, CPS 221. 7.

(*a*) पोरुषाम् CRC; गुणवतं CRBh II; सेवनात् CRBh II.

(*b*) विलय° CRBh II; एति [एव] CRBh II; ह्य् om. CRBh II; पुरा CRBh II.

(*c*) पुरः सुरकरं चोरस्य CRBh II; रोधकः CRBh II.

(*d*) पापो CRBh II; संकर. CRBh II.

Śārdūlavikrīḍita metre. (Partly defective).

1742.

बुद्धिमत्सु नराः श्रेष्ठा नरेषु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ।।

(आ) CVNS 16.24.

(इ) (Cf. Mn 1.96).

1743.

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ।।

(आ) CvL I 8.25, CvL II 8.19.

(इ) P (PP 4. 14 and 28, Pts 4. 15 and 30, PtsK 4. 16 and 32, PM 4.12. [cf. PS 1.102]) Vet 2. 2 (p. 65).

(ई) SRBh 390. 542, IS 4482, Subh 137.

(*a*) बुभुक्षिताः Subh.

(*b*) क्षीणनरा M in PP 4.14; निःक° CvL I; °करणा Subh.

(*c*) धियद° M in PP 4.14; °नस्यान् CvL I.

(*d*) एव [एति] Subh.

Upajāti metre (Upendravajrā and Indravajrā).

1743 A.

ब्रह्मघ्नोऽपि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
शशिना तुल्यवंशोऽपि निर्धनः परिभूयते ।।

(ई) In SRBh 68.4, (attributed to Cāṇakya 82).

1744.

ब्रह्महा भ्रूणहा चैव द्वावेतौ तुलया धरेत् ।
कल्पान्ते ब्रह्महशुद्धिर् भ्रूणहा नैव शुध्यति ॥

(आ) CNP II 192, CM 120. (Cf. No. 726).
(*a*) भृणहाश्चै (°व om.), CNP II (MS).
(*b*) तुलयाद्धवेत् CNP II (MS).
(*c*) ब्रह्महा शुद्धिः CNP II (MS).
(*d*) भृणहा CNP II (MS).

1745.

ब्राह्मणं बालिशं क्षत्रम् अयोद्धारं विशं जडम् ।
शूद्रमक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥

(इ) GP 1.108.5.

1746.

ब्राह्मणानां गुरुर्नास्ति वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥

(आ) CRT 8.56.

1747.

ब्राह्मणोऽपि मनुष्याणाम् आदित्यश्चैव तेजसाम् ।
शिरोऽपि सर्वगात्राणां व्रतानां सत्यमुत्तमम् ॥

(इ) GP 1.115.53.
(*b*) आदित्यश्चव GPy (printer's error).

भ

1748.

भक्तं शक्तं कुलीनं च न भृत्यमपमानयेत् ।
पुत्रवल्लालयेन्नित्यं य इच्छेच्छ्रेय आत्मनः ॥

(आ) CvL I 8.49.
(इ) P (PP 1.345, Pts 1.351, PtsK 1.397).
(ई) IS 4516.
(*a*) भ° श° tr. PP.
(*b*) न om. M in PP.
(*c*) कलवल् Pr in PP; लाभयन् N in PP.
(*d*) यद् CvL I; इछेछ्रेयम् CvL I; यदीच्छेच् PP; इच्चेछ्रेय Pts, PtsK; °छ्र्यम् bh, N, *psi*, P, Pr, p in PP; श्रेयम् A in PP.

1749.

भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो वाडिशमायसम् ।
लोभाभिपाती ग्रसते नानुबन्धमपेक्षते ॥

(आ) CRT 3.29.
(इ) MBh (MBh ⌊Bh⌋ 5.34.13, MBh ⌊R⌋ 5.33.12, MBh ⌊C⌋ 5.1106).
(ई) IS 4525.
(*b*) बडिशम् CRT.
(*c*) रूपाभिपाती MBh (Bh).
(*d*) अवेक्षते MBh (Bh).

This maxim was probably incorporated in the CRT text from MBh. Cf. JSAIL 30.41.

1750.

भद्रा समागमप्रज्ञा भद्रो धर्मयुतो नरः ।
भद्रा शीलवती नारी भद्रो विप्रो विचक्षणः ॥

(आ) CNF 80, CNI II 55.

(*a*) समागमैः प्राप्तिर् CNI II.

(*b*) धर्मयुक्तो CNF.

(*c*) Illegible in CNI II.

(*d*) भन्द्रो राजा वि° CNI II.

1751.

भर्तुश्च सततं भक्ता सततं पथ्यभोजना ।
अनेकक्रियया युक्ता सा नारी सुखशेवधिः ॥

(आ) CvṢ 8.8, CvA 8.8, CvL I 8.8. (Cf. No. 2021).

(*a*) भतुश् CvL I.

(*b*) सतं CvA; पथ्यं नाजाना CvA.

(*c*) अनेक्रि° CvL I.

(*d*) °सेवधि CvL I; °सविधिः CvṢ, CvA.

1752.

भर्तृभक्ता च सततं सर्वसौभाग्यवर्द्धिनी ।
यस्य चैतादृशी भार्या देवेन्द्रोऽसौ न मानुषः ॥

(आ) CRC 1.37, CPS 13.36. *cf/gh*. (Gf. Nos. 349,374,830,1035,1296).

1753.

भवितव्यं भवत्येव नारिकेलफलाम्बुवत् ।
गन्तव्यं गतमित्याहुर् गजभुक्तकपित्थवत् ॥

(आ) CNI I 178, CNL 56 *ab*. (Cf. No. 1494).

(इ) VCsr 12.3, VCmr 12.38-9, VCjr 12.6.

(ई) SRBh 91.22, SuM 8.26, IS 4562, Subh 159.

(उ) Vyās (C) 68.

(*a*) वभवत्यैव IS.

(*b*) नालिके° Dn in VCmr, VCjr (ŚR in VCjr as above); नारिकरि° CNI I.

(*c*) गमिष्यति च गन्तव्यं ŚR in VCjr; गच्छत्येव हि गन्तव्यं O in VCjr; गच्छतीत्येव SuM; गन्तव्यं गन्तुं पिवन्ति F in VCjr; गच्छति तथा (सदा T in VCsr; °तीत्येव E in VCjr) VCmr; आह Q in VCjr.

1754.

भाग्यं फलति सर्वत्र न विद्या न च पौरुषम् ।
समुद्रमथनाल् लेभे हरिर्लक्ष्मीं हरो विषम् ॥

(आ) CNN 58.
(ई) SuM 8.16.
(*c*) समुद्रमथना लोके CNN (MS); °मथने SuM; °मथनाद् CNN.
(*d*) हरिलक्ष्मि CNN (MS).

1755.

भाग्यक्षयेषु क्षीयन्ते नोपभोगेन संपदः ।
पूर्वार्जिते हि सुकृते न नश्यन्ति कदाचन ॥

(आ) CRCa II 27. (Cf. Nos. 435 and 1756).
(इ) GP 1.113.12.
(*a*) °क्षयेन CRCa II.
(*b*) °भोग्येन CRCa II.
(*c*) पूर्वजन्मनि सत्याचे CRT; पूर्वाजितानि सन्त्यत्र CPy.
(*d*) सुकृतं चैव दुःकृतं CRCa II.

1756.

भाग्येषु क्षीयमाणेषु सुकृतं दुष्कृतायते ।
अनुकूलेषु वा जन्तोर् अशुभं तु शुभायते ॥

(आ) CRBh II 6.5 (partly illegible). (Cf. Nos. 435 and 1755)
(*c*) अनुकूलं यदा CRBh II.

1757.

भार्या यस्य गृहे नित्यम् अतीव परिगर्विता ।
तस्य लक्ष्मीः क्षयं याति कृष्णपक्षे यथा शशी ॥

(आ) CNW 94.
(ई) IS 4573.
(*d*) कृष्णपक्षी CNW.

1758.

भार्यावियोगः स्वजनापवाद
ऋणस्य शेषं कृपणस्य सेवा ।
दारिद्र्यकाले प्रियदर्शनं च
विनाग्निना पञ्च दहन्ति कायम् ॥

(ई) In SRBh 172.827 ascribed to C (3.14) (?). (Variant of No. 249). (Cf. Nos. 277 and 880).

Upajāti metre (Indravajrā and Upendravajrā).

1759

भिक्षुको बालकश्चैव नटो राजा तथैव च ।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः ॥

(आ) CNN 3, CnT II 16.1, CnT III 7.85.

(*b*) नटो om. CNN.

1760.

भिक्षुर्विलासी विधनश्च कामी
वृद्धो विटः प्रव्रजितश्च मूर्खः ।
पण्याङ्गना रूपविलासहीना
महीतले दुश्चरितानि पञ्च ॥

(आ) CNI I 223, CnT II 21.4, CnT III 53.18.

(इ) VCbr II 12.

(ई) IS 4587, Subh 161.

(*a*) ह्यधनश्च CNI I; निधनश्च VCbr.

(*b*) मव्रजितश्च CNI I; प्रव्रजिनश्च IS; °जितस्य VCbr.

(*c*) परापाङ्गना CNI I; वेश्याङ्गना [प°] Subh; °विलोस° CNI I; °विशाल° VCbr; °हीनः IS.

(*d*) प्रजापतेर् [म°] CNI I; प्रजायते [म°] VCbr.

Upajāti metre (Indravajrā and Upendravajrā).

1760 A.

भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तमिमं संप्रवक्ष्यामि यद्यथा कथितानि च ॥

(आ) CRT 5.1 *ab*/*cd* (introductory stanza).

पैशुन्यं जनवार्त्तान्तं वित्तं दुःखत्रयान्तकम् ॥

(इ) GP 1.115.58. (Cf. P [PT 1.169, PTem 1.156, PS 1.143, PN 2.116, PP 1.396, PRE 1.160, PM 1.175]).
(*d*) दुःखकृतान्तकम् GP.

1897.

लावण्यद्रविणव्ययो न गणितः क्लेशो महान् स्वीकृतः
स्वच्छन्दस्य सुखं जनस्य वसतश्चिन्तानलो दीपितः ।
एषापि स्वयमेव तुल्यरमणाभावाद् वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥

(आ) CRC 8.89, CPS 250.81.
(इ) Kṣemendra's Aucityavicāracarcā 3 (ascribed to Dharmakīrti), Dhvanyāloka (HSS 66) p. 532, SV 1472 (ascribed to Dharmakīrti), SRBh 286.29, JS 172.9, IS 5850, Kuval *ad* 72 (p. 136), Alaṁkārasarvasva (KM 35) *ad* 22 (p. 86), Sabhyālaṁkaraṇa of Bhaṭṭa Govindajit (MS BORI 417 of 1884-87) 1.25, Śṛṅgārālāpa (MS BORI 92 of 1883-84) 3.87, Subhāṣitaratnakośa of Bhaṭṭa Śrī Kṛṣṇa (MS BORI 93 of 1883-84), Subhāṣitahārāvalī of Hari Kavi (MS BORI 92 of 1883-84) 16 *a*, 88, Hemacandra's Kāvyānuśāsana (KM 71) 313, Mammaṭa's Kāvyaprakāśa 494, Subhāṣitāvalī of Gopīnātha (MS BORI 820 of 1886-92) 65a, Vidyākara's Subhāṣitaratnakoṣa (HOS 42) 454, SRK 107.3, Kav 202, SRHt 245.6, Skm 2.68.4 both ascribed to Dharmakīrti. See Aufrecht in Weber's Indische Studien 16.206.
(*a*) अर्जितः [स्वी°] SRBh, SRK.

(*b*) स्वच्छन्दं चरतो (चसतो; चसतोः Skm) Skm, SRBh, Kuval, SRHt, SRK, Alam°; सखीज° Dhva°; हृदये (वृदये) चिन्ताज्वरो निर्मितः SRBh, Kuval, Skm, SRHt, SRK, Alam°, Dhva°; °न्ताज्वरो निर्मितः Aucit°, JS, Kuval; °न्तालोद् CRC.
(*c*) एषासि CRC; स्वागुणनानुरूपर° SRBh, Alam°, Skm, Kuval, SRHt, SRK.
(*d*) विनिहत° CRC, Auci°; °हितस्त्व° SV; हितस्तन्विमिमां SRBh, Kuval SRK.

Śārdūlavikrīḍita metre.

1898.

लीलया ललितं वाक्यं मधुरं सर्वदा वदेत् ।
मृद्वच्छं शीतलं वारि शनैर्दारयते गिरिम् ॥

(आ) CNI I 48, CNT IV 108.
(ई) IS 5854, Subh 100.
(*b*) च सदा भवेत् CNI I.
(*c*) मृद्वकं Subh; मृदुत्वात्सी° CNI I.
(*d*) शनैवारियते गिरीन् CNI I.

1899.

लीलां करोति यो राजा भृत्यवित्तैश्च गर्वितः ।
संवादे विग्रहे क्षिप्रं रिपुभिः परिभूयते ॥

(आ) CRT 4.13.
(इ) GP 1.111.29.
(*b*) भृत्यस्वजनगर्वितः (°सज्जन°) GP.
(*c*) शासने सर्वादा GP.
Cf. Crn. 97.

1900.

लीलासुखानि भोग्यानि त्यजेदिह महीपतिः ।
सुखप्रवृत्ताः साध्यन्ते शात्रवैर्विग्रहे स्थितैः ॥

(आ) CRT 4.15.
(इ) GP 1.111.31.
(उ) (Cf. LN ⌊P⌋ 134, NKy ⌊B⌋ 161).
(*c*) °प्रवृत्तैः GP.
(*d*) शात्रवो GP.
Cf. Crn. 94.

1901.

लोकः पृच्छति सद्वार्त्तां शरीरे कुशलं तव ।
कुतः कुशलमस्माकम् आयुर्याति दिने दिने ॥

(आ) CSC I 2.99, CNW 12, CNPN 47.
(इ) PrC 2.113.
(ई) Kavitāratnākara 152, TP 384, IS 5867.
(*a*) किं पुंसां सि च वार्ताव्यां (?) CNPN; लोक CSC I; पृच्छेदिदं वाक्यं CNW; मे वार्त्त CSC I, PrC.
(*b*) शरीरं CNW, CNPN; मम [त°] CNPN.
(*c*) कुत CSC I.

1902.

लोकप्रसिद्धमेवैतद् वारि वह्नेर्नियामकम् ।
उपायोपगृहीतेन तत् तेनैव विशोष्यते ॥

(ई) In SRHt 151.6 ascribed to C.

1903.

लोको यथा किल तथा न हि भूपतिः स्यात्
सद्भूपतिः खलु यथैव तथैव लोकाः ।
धर्मप्रवृत्तिरथ तद्विपरीतवृत्तिः
कृत्स्ने जने नरपतिः प्रभवत्यशेषम् ॥

(आ) CRC 4.56, CRB 4.46, CPS 90.22.
(*a*) लोका CRC.
Cf. Crn. 239.
Vasantatilakā metre.

1904.

लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न प्रमादः कस्मिन् हि वा न विश्वसेत् ॥

(आ) CvTb 3.16, CRT 8.25, CNI I 105.
(इ) GP 1.115.44.
(ई) IS 5880.

(*a*) लोभात् प्रसादाद् विश्वसात् CNI.

(*b*) पुरुषा रंणभार्यं भवेत् CNI; नश्यते IS; भिद्यति [न°] CvTb.

(*c*) कर्तव्यः (°व्यो CNI) [प्र°] CvTb, CNI, GP.

(*d*) प्रमादो नो (न IS) न विश्वसेत् GP; न प्रमादे न विश्वसेत् CNI; प्रमादं नैव वि° CvTb.

1905.

लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते ।
लोभान् मोहश्च माया च मानः स्तम्भः परासुता ॥

(आ) CNMN 132.

(इ) MBh (MBh ⌊Bh⌋ 12.152..4, MBh ⌊R⌋ 12.158.4, MBh ⌊C⌋ 12.5880). (Cf. Bhojaprabandha 2).

(ई) SRBh 69.2, IS 5883.

(*a*) लोभा CNMN.

(*b*) प्रजायते SRBh.

(*c*) नाशश्च [मा°] SRBh.

(*d*) मान MBh (Bh), MBh ⌊R⌋; लोभः पापस्य कारणम् SRBh.
Cf. JSAIL 30.100.

1906.

लोभात् प्रमादाद् विश्वासात् पुरुषो बध्यते त्रिभिः ।
तस्माल् लोभं प्रमादं च विश्वासमपि नाचरेत् ॥

(आ) CNSap 62.

1907.

लोभार्तः परुषो दीनो योऽभक्तश्च प्रगल्भवाक् ।
विद्वेषी पापकर्मा च राज्ञा त्यक्तव्य एव सः ॥

(आ) CRT 5.14.

1907 A.

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥

(आ) CNŚIV 65.

(इ) H (HJ 1.150, HS 1.133, HM 1.139, HK 1.142, HP 1.108, HM 1.109, HH 27.18-9, HC 37.10-1).

(ई) SRBh 69.5, IS 5887.

व

1908.

वचस् तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम् ।
स्थायीभवति चात्यन्तं रागः शुक्लपटे यथा ॥

(आ) CvW 8.16, CvP V 8.11, CvLd 8.11.
(इ) P (PP 1.56, Pts 1.33, PtsK 1.39), Śts, MS A 711.
(ई) IS 5905, Subh 31.
(*a*) वाचा CvW, CvP V; तस्य [त°] Pr in PP; प्रयोगतव्याः CvW; °व्या CvP V.
(*b*) यत्रोक्ता CvP V, CvW; सफलं भवेत् Subh; फक्तं IS; सुखं [फ°] CvP V; सुषं [फ°] CvW.
(*c*) स्था॰° CvW; स्थायि भ° PtsK; °भवती CvW; °न्तः CvW.
(*d*) राग CvP V; रागं CvW; °पटै CvW.

1909.

वज्राद्वज्रकृतं प्रणश्यति भयं श्रीः पद्मरागाद् भवेन्
नानाकारमपि प्रशाम्यति विषं गारुत्मतादश्मनः ।
एकैकं क्रियते प्रभावनियमात् कर्मेति रत्नैः सदा
पुंरत्नैः पुनरप्रमेयमहिमोन्नद्धैर्न किं साध्यते ॥

(आ) CRC 5.42, CRB 5.41, CRBh II 5.45-6, CRCa I 5.39, CPS 132.66.
(इ) RT 4.331.
(ई) IS 5910.
(*a*) भयं विरमति [प्र° भ°] RT; प्रपश्यति CRBh II; श्री CRBh II; रोगोद्भवे CRBh II; °वेत् CRC, CPS.
(*b*) प्रणश्यति CRB; गारुत्मतोदशनात् CRBh II.
(*c*) कुरुते [क्रि°] CRBh II; °चयात् CRC, CPS; °चमात् CRCa I; कर्मोतिर° RT (Troyer's ed. only); कर्मातिर° IS; परं [स°] RT.
(*d*) पुंरत्नैः मनुसप्रभवकर्मेणभ° CRBh II; पुंरत्नैर्मुहुरप्र° CRC, CPS; पनरप्र° IS; °प्रेम° CRCa I; °मोद्बद्धैर्न CRC; °मैर्वद्धैर्न CPS; वध्यते [सा°] CRBh II.

Śārdūlavikrīḍita metre.

1910.

वदन्ति मुनयः सर्वे नानृतात्तापकं परम् ।
सत्यात् परतरं नास्ति तस्मात् सत्यं वदाम्यहम् ॥

(आ) CNN 40.

1911.

वनानि दहतो बह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय क्षीणे कस्यास्ति गौरवम् ॥

(आ) CNW 99, CNF 74, CNPN 60, CNL 100, CRBh II 7.57, CnT II 23.5, CnT III 56.10.

(इ) BhŚ 728, VCsr 12.9, P (PP 3.49, Pts 3.57, PtsK 3.56, PM 3.19).

(ई) ŚP 488, SV 2682, SRBh 155.120, SRK 223.15, SRHt 228.9, RJ 1475, IS 5927, Subh 228 and 273, TP 487.

(*a*) दहते CNL, CNF (fn.); दह्यते CNF; वह्निः CNF; वह्निस् IS.

(*b*) तस्येव [भ°] Nd in VCsr.

(*c*) दिप° IS; एवाहविना° CNL (corrupt).

(*d*) कृशे (?) [क्षी°] CNPN, PP (न्यशे P in PP), Pts, PtsK, ŚP, SV, SRK, SRHt, VCsr (J in VCsr as above); कृते Q in VCsr; कृशो IS; कुतः क्षीणेषु सौहृदम् BhŚ; कस्यापि *bhN* in PP; सौहृदम् (?) CNPN, VCsr, PtsK, ŚP, SV, SRHt, SRBh, SRK; सौहृदि IS.

1912.

वनेऽपि सिंहा न नमन्ति कर्ण
बुभुक्षिता नांशनिरीक्षणं च ।
धनैर्विहीनाः सुकुलेषु जाता
न नीचकर्माणि समारभन्ति ॥

(इ) GP 1.115.14. (Cf. No. 1913).

(*a*) कन्तु [कर्ण] GPy.

(*b*) बभूक्षिता GP; मांसनिरीक्षणञ्च GPy.

(*d*) समारभन्ते GP in the Purāṇic Authology ed. by A. P. Karmarkar, Thalakwadi, Belgaum, 1955.

Upendravajrā metre.

1913.

वनेऽपि सिंहा मृगमांसभक्षा
बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता
न नीचकर्माणि समाचरन्ति ॥

(आ) CvTb 7.27, CNP II 33, CNI I 290. (Cf. No. 1912).
(इ) BhŚ 729, PtsK 4.75.
(ई) SRBh 49.168, SRK 15.46, IS 5930.
(*a*) सिंहो CNI; मृगमांसभक्षणाद् BhŚ; °भक्षणो CvTb, SRBh, SRK; °भक्षी CNI.
(*b*) °क्षितो CNI; तृणंश° CNI; तृणे SRK; वरन्ति IS.
(*c*) तथा [ए°] CvTb, CNP II.
(*d*) न नीचसङ्गात् सुखमाद्रियन्ते BhŚ; न नीतिमार्गं परिलङ्घयन्ति PtsK.
Upajāti metre (Upendravajrā and Indravajrā).

1914.

वयो वित्तं गृहच्छिद्रं मन्त्रं मैथुनमौषधम् ।
तपो दानावमानानि नव गोप्यानि यत्नतः ॥

(आ) CRBh II 8.39. (Cf. Nos 87,1089,1239).

1915.

वरं तेजस्विनो मृत्युर् न तु मानस्य खण्डनम् ।
मृत्युरेकादिनं हन्ति ह्यपमानः पदे पदे ॥

(आ) CRC 2.7.

1916.

वरं न जातो न च जातमूर्खो
वरं मृतो यो न करोति धर्मम् ।
वरं क्षुधार्थो न परान्नभोजी
वरं च न स्त्री न च दुष्कलत्रम् ॥

(आ) CvTb 5.3, CM 192. (Cf. Nos. 282-3, 286, 288, 747, 905, 1071, 1376-7, 2139).

(*b*) थो [ग्रो] CvTb.
(*c*) पन्न° CvTb.
(*d*) दुःक° CvTb.

Upendravajrā metre.

1917.

वरं पण्डितशत्रुत्वं न च मूर्खेण मित्रता ।
वानरेण हतो राजा विप्रश्चौरेण रक्षितः ॥

(आ) CNW 19. (Cf. Nos. 1671 and 1918).
(इ) (Cf. Tantr 486).
(ई) IS 5973.
(*b*) मैत्रता CNW.
(*d*) विप्रचौरेण रक्षितः CNW.

1918.

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि ॥

(आ) CNI I 84, CNG 235, CNT IV 142, CNM 140, (CNMN 106), CnT II 30.8, CnT VII 95. (Cf. Nos. 1917 and 1671).
(इ) BhŚ 320, PP 2.89 *ab*, (only).
(ई) SRBh 39.5, SRK 35.11, IS 5975, Sskṛ 62, SuB 3.25, Subh 118 and 188.
(*a*) गहन° [प°] IS; °दुर्गोषु CNI I.
(*b*) संभ्रांतं वानरैः सहा CNI I; भ्रमन्वचरै सहः CNM
(*c*) नो DF in BhŚ; मा [न] $E_{0-2\cdot5}$ in BhŚ; मूर्ष° CNM; °संसर्गः (°र्गं CNM; °र्गो E_2 in BhŚ; °गो D in BhŚ) CNI, CNM, $DE_{0,2,3,5}$ F_3 in BhŚ, SuB; °संपर्क IS; नपसंर्कः SRBh (printer's error).
(*d*) ऽसुरेंद्र° D in BhŚ; सुरेश° W_4 in BhŚ; °भुवने° CNM, $DE_{0,t,3,5}$ F_5 $W_{3,4}$ in BhŚ.

1919.

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा ।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥

(आ) CNN 26, CNP II 92, CnT II 18.11, CnT III 8.5.

(इ) P (PP 5.33, Pts 5.39, PtsK 5.31, PM 5.15), Vet 21.14.

(ई) IS 5980, Subh 8, SuB 14.12.

(*a*) वरा CNN; स्याद् [सा] CNN; बुद्धिहीनं न सा SuB.

(*b*) विद्या बु° CNP II, Subh; विद्याबुद्धेर्गरीयसी CNN (MS); विद्यातो (°द्याया Pts, SuB) बुद्धिरुत्तमा PP, PtsK, Pts, SuB, Vet.

(*c*) बुद्धिहीनः विनस्यन्ति IS; विनश्यंते N in PP.

(*d*) हि [ते] CNN.

1920.

वरं वनं वरं भैक्षं वरं भारोपजीवनम् ।
वरं व्याधिर्मनुष्याणां नाधिकारेण संपदः ॥

(आ) CvL I 8.42. (Cf Nos. 907,908,909, 2206).

(इ) P (Pts 1.280, PtsK 1.312).

(ई) (Cf. ŚP 1374, SRK 105.5, SRBh 97.5, IS 5948).

(*a*) वनं [वरं second] CvL I; भैक्ष्यं Pts, PtsK.

(*b*) °जीवतं CvL I.

(*d*) नधिकारोन CvL I; संपदा CvL I.

1921.

वरं हालाहलं पीतं सद्यः प्राणहरं विषम् ।
न तु वरं धनाढ्यस्य भ्रूभङ्गकुटिलं मुखम् ॥

(आ) CNP II 215, CNG 168, CNT IV 210, CNM 173, CNMN 138, CM 144.

(इ) Vet 8.6.

(ई) ŚP 259.

(*b*) सद्यं CNM; प्राणंहिरं CNM.

(*c*) ननु *c* in Vet; न तुष्टो B in Vet; दृष्टिः [व°] CNM, Vet (द्दष्टं D in Vet; दुष्ट A in Vet); दृष्टं ŚP; धनांधस्य AC in Vet (°धस्तु B in Vet), ŚP.

(*d*) भ्रूमङ्ग° CNP II (MS) (scribe's error); °ङ्गः Bc in Vet; °कुटिलननां CNM, Vet (°नः B in Vet; A in Vet as above).

1922.

वर्जयेद् विदलं शूली कुष्ठी मांसं ज्वरी घृतम् ।
नवमन्नमतीसारी नेत्ररोगी च मैथुनम् ॥

(आ) CvP IV 3.15, CvGt 3.12, CvTb 3.19, CM 194.

(ई) *ab* in ŚKDr *ad* शूली [न].

(*b*) क्षयी स्त्रियम् ŚKDr; ज्व° घृ° tr. CvP IV.

(*c*) अतिसारी CM; in CvP IV first two *akṣara-s* illegible.

1923.

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥

(आ) CNP II 125.

(इ) BhŚ 156. (Cf. MBh ⌊R⌋ 13.7.24-5, Hariv 1644, BhŚ 504, P ⌊PP 5.63, Pts 1.83, PtsK 5.15⌋, HJ Intr 11).

(ई) ŚP 419, SRBh 76.4, SRK 67.6, IS 5993. (Cf. Subh 72 and 297, Kk 64-5, IS 2349, 5683 and 5936).

(उ) Vyās (C) 30.

(*a*) विलिभिर् A_2 in BhŚ; वलिभिर् E_3 W_{2-4} X_2 in BhŚ; वलीभिर् $H_{1,2,3t}$ Y_3 in BhŚ; आपन्नं [आक्रा°] IS.

(*b*) पलितंरंकितः J_1 in BhŚ; फलितैरंकितं J_3 in BhŚ; पतितैरंकितं X_2 in BhŚ; पलितेनांकितं $Y_{3-5,8}$ T_1 in BhŚ; पतितैः कंपितं G_1 M_2 in BhŚ; वलितैरंकितं M_1 in BhŚ; शिराः X_2 in BhŚ.

(*c*) शिथिलं यांति J_3 in BhŚ.

(*d*) तृष्णैक° E_{3t} in BhŚ; त्रुणिका J_{2t} in BhŚ; तृष्णिका J_{2c} in BhŚ.

1924.

वशे साधनीया प्रज्ञा क्रोधेन सा विनश्यति ।
क्षमायां कुरुते कार्यं क्रोधेन तद् विनश्यति ॥

(आ) CNP II 288, CM 148.

(*a*) वशि CNP II (MS); °नी (या om.) प्राज्ञा CNP II (MS).

1925.

वसन्ति नगरे देवास् तथा ग्रामेऽधमा जनाः ।
ग्रामान्तरे पिशाचाश्च ग्राममध्ये तु राक्षसाः ॥

(आ) CNP I 61, CNP II 87, CNT IV 61, CNM 61, CM 149.
(*a*) नगरे तिवसं देवाः CNP II.
(*b*) ग्रामे वसन्ति मानवा CNP II; ग्रामे च मानवा CNM.
(*c*) ग्रामकुले CNP II.
(*d*) गि...वारता...स्तु रा° CNP I; गीर्वाह्याश्च रा° CNM.
Cf. Crn. 258.

1925 A.

वसिष्ठकुलजातोऽपि यः खलः खल एव सः ।
चन्दनादपि संभूतो दहत्येव हुताशनः ॥

(आ) CNG 312.
(ई) Subh 275, IS 6001.
(*a*) वशिष्ठ° Subh.

1926.

वसेन् मानाधिके स्थाने मानहीनं विवर्जयेत् ।
मानहीनं सुरैः सार्धं विमानमपि वर्जयेत् ॥

(आ) CNG 256.
(इ) P (PT 2.63, PTem 2.52, PS 2.34, PP 2.82, PRE 2.36, PN 1.31). (Cf. BhŚ 648, PP 2.83).
(ई) IS 6003, Subh 236.
(*a*) श्रयन् [व°] PP; वसे Subh; °धिकं वासं (स्थानं PT, PTem) PRE, PS, PP, PT, PTem, Subh.
(*b*) भग्नमानं न संश्रयेत् PRE, PS, PP; न संवसेत् [वि°] PT, PTem.
(*c*) सुरैस् PTem.
Cf. Crn. 112.

1927.

वस्त्रहीनस्त्वलंकारो घृतहीनं च भोजनम् ।
स्वरहीनं च गान्धर्वं भावहीनं च मैथुनम् ॥

(आ) CNP II 16, CNG 302. (Cf. No. 920).

(इ) Vet 9.9.
(ई) Subh 240, IS 6011.
(*a*) वस्त्रहीनमलंकारं CNP II, Vet, Subh.
(*b*) °व हि *d* in Vet; °हीनमभो° *e* in Vet.
(*c*) स्व [च] *a* in Vet.

1928.

वाचा विहितसार्थेन लोको न च सुखायते ।
जीवितं मानमूलं हि माने म्लाने कुतः सुखम् ॥

(इ) GP 1.115.40.

1929.

वाणिज्ये वसते लक्ष्मीस् तदर्धं कृषिकर्मणि ।
तदर्धं राजसेवायां भिक्षायां नैव नैव च ॥

(आ) CNPN 94. (Cf. Nos. 489 and 1709).
(ई) TP 460, IS 6034.
Cf. Crn. 170.

1930.

वादेन बहवो नष्टा यथा कौरवपाण्डवाः ।
वरमर्थपरित्यागो न च वादः परैः सह ॥

(आ) CNF 71, CNL 50, CNI II 20.
(*a*) बाधेन Teza in GSAI 45.
(*b*) येन [य°] CNL, CNF (MS B); कोखपाडवा CNF (MS); °पाएडव° CNL, CNF (MS B).
(*c*) अर्थे° CNF (MS).
(*d*) वादपरेसह CNF (MS); वादपरैः CNF and CNF (MS B).

1931.

वित्तायत्ताः सदा धर्मा वित्तं कामनिबन्धनम् ।
वित्तायत्तानि सर्वाणि वित्तं जीवितवर्द्धनम् ॥

(आ) CRC 4.16, CPS 92.28. (For similar thoughts see No. 93).
(*a*) °यत्ता CPS.

(*b*) °निवारणम् CPS.
(*c*) °यित्ताणि CRC.

Cf. Crn. 53.

1932.

विदितं न तु कामुक ते हृदयं
प्रमदाधरसंगमलुब्ध इव ।
वनिताकरतामरसाभिहतः
पतितः पतितः पुनरुत्पतितः ॥

(आ) CRBh II 8.94.
(*c*) °तामसा° CRBh II.

Toṭaka metre.

1933.

विदुषी धर्मतत्त्वज्ञा या भार्या पतितत्परा ।
स्वल्पकेनापि संतुष्टा सा श्रीरेवास्ति रूपिणी ॥

(आ) CvṢ 7.7, CvA 7.7, CvL I 7.7 (partly illegible).
(*c*) °केना° (°पि missing) CvA.
(*d*) रूपणी CvA.

1934.

विद्यां ददाति योऽस्मभ्यं स शिक्षागुरुरुच्यते ।
येन केनाप्युपायेन हितं तस्य समाचरेत् ॥

(आ) CNNM 64.

1935.

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्याश्रयं सम्बलं
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥

(आ) CRC 2.36, CRB 2.31, CRBh II 2.31, CNI I 13, CNF 105 *ac*/(*b*)*d*, CPS 35.30.

(इ) GP 1.115.81, BhŚ 70, VCsr 9.3, VCjr 21.1, GR 3, HJ *ad* Intr 48 *ac*/(*b*)*d*.

(ई) SRBh 30.15, SRK 42.1, IS 6089, Pras 19.4, Subh 8, SuM 11.3, SuB 3.9-10.

(उ) PrŚ (C) 4.

(*a*) कुरूपरूपं [न° रू°] GP; अधि (कं om.) CRBh I; अतुलं [अधि°] SuB; प्रछन्नमन्तर् CRBh II, V in VCsr, O in VCjr, PrŚ (C); विद्यातिगुप्तं CNF, GP, HS.

(*b*) विद्या कीर्तिकरी सभावशकरी विद्या परं लोचनम् CNF, HS; सधुकरी जनप्रियकरी GP; सुख-करी CRBh II, CNI; शुभकरी CRC, GR; °सुखवती SuB.

(*c*) बन्धुरसं वि° CNF, HS; बन्धुजनार्त्तिनाशकरी GP; बन्धनुजः सुदेश Ś in VCjr; °गमनो T in VCsr; विद्यापरं भूषणं CRBh II; विद्यापरं (°परा VCsr, SRK) दैवतं (देवता BhŚ, VCsr, SRK, GP) CNI, VCjr, VCsr, GP, BhŚ, SuB, SuM, SRK, SRBh.

(*d*) राजकुलाभिमानजननी SuM; पूजिता BhŚ, TNd in VCsr, SuB; न हि (तु VCjr; बहु MNd in VCsr) धनं CRBh II, BhŚ, VCsr, VCjr, Guṇar°, SRK; पूजिते Q in VCsr; पूजिता BhŚ, TNd in VCsr, SRK; दुरितहा [न...] SuB; जीवन-हेतुकात्रिभुवने (°तुरत्र भुवने HS) CNF, HS; प्रतिदिनं [ब°] CNI.

Cf. Crn. 75.

Śārdūlavikrīḍita metre.

1936.

विद्या प्रशंसिता लोके न शरीराणि देहिनाम् ।
एकः साधुः सुशब्दश्च कृष्णोऽपि श्लाघ्यते पिकः ॥

(आ) CvṢ 3.7, CvA 3.7, CvL I 3.7, CvL II 3.7, CNŚK 46.

(*c*) एकेन शाधु शब्देन CvL I.

(*d*) कृष्णोश्लाघ्यतेपि° CvA.

1937.

विद्या प्रशस्यते लोके विद्या सर्वत्र गौरवम् ।
विद्या च पूजिता लोके विद्या सर्वत्र पूज्यते ॥

(आ) CLH 7.3. (Cf. Nos. 934 and 941).

(*a*) प्रशस्यतै CLH.

1938.

विद्या मित्रं विदेशे च सुस्त्री मित्रं गृहे तथा ।
संग्रामे च शुजौ मित्रौ अन्तकाले जनार्दनः ॥

(आ) CNN 14. (Cf. Nos. 103 and 935).
(*a*) च not in the text; added *metri causa*.

1939.

विद्यारत्नं सरसकविता यानरत्नं तुरङ्गो
वाञ्छारत्नं परमपदवी भोगरत्नं मृगाक्षी ।
स्रोतोरत्नं विबुधतटिनी मासरत्नं वसन्तो
भूभृद्रत्नं कनकशिखरी भूपरत्नं नृसिंहः ॥

(आ) CRBh II 8.77, CnT II 16.4, CnT III 7.88.
(इ) PX 1.33 (cf. ZDMG 61.46).
(ई) SRBh 115.45, Pras 24.1, IS 6095.
(*c*) अंभोरत्नं [स्रो°] CRBh II.
(*d*) चरामः [नृ°] CRBh II.

Mandākrāntā metre.

1940.

विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् ।
सेवावृत्तिविदां चैव नाश्रयः पार्थिवं विना ॥

(आ) CvL I 8.46.
(इ) P (Pts 1.37, PtsK 1.43), Śts 22.1-2.
(ई) SRBh 148.248, IS 6097.
(*a*) महेच्छानां CvL I, PtsK; गृहस्थानां MM_1 in Śts.
(*b*) °विक्रय° CC_1 in Śts.
(*c*) सेवावृत्ति विना M in Śts; सेवावर्त्तिविदांश् CvL I.
(*d*) नाश्रयं पार्थिवं विदुः CC_1 in Śts.

1941.

विद्यावन्तं धनाढ्यं च लक्ष्मीवन्तं बहुश्रुतम् ।
रणे शूरं च दातारं कनिष्ठं ज्येष्ठमुच्यते ॥

(आ) CvTb 8.26, CNP II 70, CM 151.

(*a*) राज्ञमान्यं [वि°] CvTb (cf. *b*); तं [च] CNP II.
(*b*) विद्यावन्तं तपस्विनां CvTb (cf. *a*).

1942.

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतज्
ज्ञानाय दानाय च रक्षणाय ॥

(आ) CRB 6.57, CSLd 3.97.
(इ) GR 7.
(ई) Subh 236, IS 6099.
(*b*) परपी° Subh.
(*c*) खरस्य CSLd; एतत् GR; °तमेतत CSLd (scribe's error).

Upajāti metre (Upendravajrā and Indravajrā).

1943.

विपरीतरतिः कामः स्वायत्तेषु न विद्यते ।
यत्रापायो बधो दण्डस् तथैव ह्यनुवर्त्तते ॥

(इ) GP 1.114.7.
(*d*) तत्रैव GPy.

1944.

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥

(आ) CLP IV 7.3.
(इ) Mn 2.155, Vi 32.18.
(ई) IS 6163, NT 155.

This maxim was probably incorporated in the CLP IV text from Mn.

1945.

विप्राणां भूषणं विद्या पृथिव्या भूषणं नृपः ।
नभसो भूषणं चन्द्रः शीलं सर्वस्य भूषणम् ॥

(इ) GP 1.113.13. (Cf. Nos. 364,523,526, 1454,1545,1946,2154).

1946.

विप्राणां भूषणं विद्या मन्त्रिणो राजभूषणम् ।
भूषणं च पतिः स्त्रीणां शीलं सर्वस्य भूषणम् ॥

(आ) CLṢ 5.13. (Variant of No. 523). (Cf. Nos. 364,526,1454,1545, 1945,2154).
(*b*) मंत्रिणो CLṢ.

1947.

विप्रे चाष्टगुणं दानं क्षत्रिये च चतुर्गुणम् ।
वैश्ये तु द्विगुणं दानं शूद्र एकगुणं भवेत् ॥

(आ) CNPN 71, CM 152.
(*b*) °गुणा CNPN (MS).
(*d*) शूद्रमेक° CNPN (MS).

1948.

विरक्ता प्राणसंदेहं धनहानिं पराभवम् ।
करोति सर्वमप्येवं वशा नारी न दुर्जनः ॥

(आ) CNP II 177, CM 153. (Cf. No. 1874).
(*b*) धनि° CNP II (MS).
(*c*) काराति CNP II (MS).

1949.

विश्वसेत् कृष्णसर्पस्य खड्गपाणेर्न विश्वसेत् ।
नायका चपलचित्ता स्त्रीचरित्रं न विश्वसेत् ॥

(आ) CNP II 170.
(इ) Vet 3.24, VCbr II 19 (p. 261 *b*).
(ई) IS 6202.
(*a*) न विश्व° CNP II, *ABD bc*, *de* in Vet, VCbr (*contra metrum*); °सर्पे *d* in Vet °सर्पे *D* in Vet.
(*b*) खड्गहस्तस्य (°स्थ VCbr) वैरिणः (शस्त्र° *c* in Vet; हस्तं च वैरिणम् *D* in Vet) VCbr; खकपाणेर् *e* in Vet.

(*c*) आचारं चलचित्तस्य (आचार VCbr, *b* in Vet; नाचार *a* in Vet; आचार्य *BD* in Vet; आचार्ये c_2 *e* in Vet; अनिवार्य *A* in Vet; अचार्य *d* in Vet; बलवित्तस्य *AB* in Vet; चलचित्ते च c_2 in Vet; °चित्तं च *D* in Vet), Vet, VCbr.

(*d*) त्रि° *B* in Vet; °त्रे *D* in Vet.

1950.

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनास्
तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवास्
तेषामिन्द्रियनिग्रहो यदि भवेद् विन्ध्यः प्लवेत् सागरे ॥

(आ) CRBh II 3.57.
(इ) BhŚ 330, PrC 4.182 v. l.
(ई) SRBh 252.57, SRK 235.47 and 278.7, IS 6204.
(*a*) ये ऽन्ये ऽम्बुपत्राशिनस् PrC; ये चांबु° E_2 $W_{2,3t,4}$ in BhŚ; °पत्राशनास् E_2W in BhŚ; °शिनस् JX_2 G_1 $M_{1,2}$ in BhŚ; °शीनस् CRBh II.
(*b*) दिव्य [तेऽपि] $M_{3,4}$ in BhŚ; दृष्ट्वा च $E_2$$Y_{3,7}$ in BhŚ; दृष्ट्वा वि° $F_3$$G_3$$M_4$ in BhŚ; दृष्ट्वापि J$G_{2,4}$ M_{3-5} in BhŚ; दृष्ट्वातु Y_3 in BhŚ; संमोहिता: X_1 in BhŚ.
(*c*) आहारं [शा°] PrC_1 E_2 in BhŚ; घृतसंयुतं दधिपयो W_{2-4} in BhŚ; सुघृतं पयोदधियुतं $Y_{4,5}$ in BhŚ; सगुळं पयोदधियुतं M_5 in BhŚ; ते भुंजते J_1, in BhŚ; ये (हे G_2) भुंजते CRBh II, $Y_{1BC,4-6,8}$ T$G_{2-5}$$M_{1,2,5}$ in BhŚ.
(*d*) कथमहो E_2 in BhŚ; वत भवेत् W_C in BhŚ; दंभः समालोक्यतां E_2 in BhŚ; विन्ध्यस् तरेत् CRBh II, SRBh, SRK, WY_1 in BhŚ; सागरं CRBh II, W_2 in BhŚ.

Śārdūlavikrīḍita metre.

1951.

विषम् ऋणं च गर्भस्तु श्वानमैथुनमेव च ।
प्रवेशे सुखमाप्नोति निर्गमः प्राणनाशकः ॥

(आ) CNPN 108, CM 154. (Cf. No. 1277).
(ई) (Cf. Subh 255, ⌊IS 226⌋).
(उ) (Cf. NŚ ⌊OJ⌋ 3.6).
(*a*) विषो हि ऋणं ग° CNPN (MS).
(*d*) निर्गमे CNPN (MS).

1952.

विषं कुपठिता विद्या विषं व्याधिरुपेक्षिता ।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥

(आ) CvH 8.15, CvL I 8.24, CvL II 8.18. (Cf. Nos. 463 and 1953).
(*b*) °क्षितः CvL I.
(*c*) गोष्ठी CvL I.

1953.

विषं राजा भवेन् मूर्खो विषं वार्त्ता हरिं विना ।
विषं गोष्ठिर्दरिद्रस्य वृद्धस्य तरुणी विषम् ॥

(आ) CvGt 6.17. (Cf. Nos 463 and 1952).
(*b*) विष CvGt.
(*c*) गोष्टि° CvGt.

1954.

विषयी तिमिराघूर्णः सज्जनं च न पश्यति ।
आपन्नं चैव मात्रं हि पुनः पश्यति निर्मलः ॥

(आ) CNW 70.
(ई) IS 6223.
(*c*) O. Böhtlingk changes मात्रं हि to पात्रं च; this change improves the text. (See CNW p. 428).

1955.

विषस्य विषयाणां च दूरमत्यन्तमन्तरम् ।
उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ॥

(आ) CnT II 27.2, CnT VII 51.
(इ) BhŚ 751.
(ई) SV 3368 (ascribed to Candragopi), SRBh 158.231, IS 6225, Subh 75, SuM 23.20, SRHt 259.3.
(*a*) °यानञ्च Subh; हि [च] SRBh, SuM.
(*b*) दूरमन्यतमंतरां Subh; दृश्यते महदन्त° SRBh; दूरमेवान्तरं मनम् SuM.

1956.

विषादः कलहो हानिः कोपो मानो वृथाश्रमः ।
पैशुन्यं मत्सरः शोकः सर्वे द्यूतस्य बान्धवाः ॥

(आ) CNP II 110, CM 155. (Cf. Nos. 1308, 1610,1618).
(इ) Vet 21.3.
(ई) Cf. IS 3040.
(*a*) विषाद कलहे हानि CNP II (MS); रातिः [हा°] Vet (सत्यं *A* in Vet; °हश्चैव *g* in Vet; °चाऽऽधिः *c* in Vet; राढिः *e* in Vet; रटि *B* in Vet; राज्ञः *b* in Vet).
(*b*) काप मान वृ° CNP II; मानः श्रमो भ्र° Vet; कोपं मानं मृशाश्रमं *c* in Vet; मानश्च संभ्र° *g* in Vet.
(*c*) पैशू° *g* in Vet; पैशून्ये *Be* in Vet; मत्सरं CNP II (MS); सार्थद्यू° *b* in Vet.

1957.

वीणा वंशश्चन्दनं चन्द्रभासः
चन्द्राभासा यौवनस्था रमण्यः ।
नैतद् रम्यं क्षुत्पिपासातुराणां
सर्वारम्भास्तण्डुलप्रस्थमूलाः ॥

(आ) CRC 7.71, CPS 214.101.
(ई) SV 3174, SRBh 66.40.
(*b*) शय्या यान [च°] SV, SRBh; °स्थास् तरुण्यः SV, SRBh.
(*c*) °सार्दितानां SV, SRBh.
Śālinī metre.

1958.

वृत्तेन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
सुनीत्या रक्ष्यते राजा सद्गृहिण्या तथा कुलम् ॥

(आ) CNŚC 82, CNŚI 82, CNŚ 82, CNŚIV 83. (Variant of No. 930. Cf. No. 2025).

1959.

वृद्धः प्रसिद्धो विबुधो विदग्धः
शूरः श्रुतिज्ञः कवयः कुलीनाः ।
विलोकयन्तः सधनस्य वक्त्रं
जयेति जीवेति सदा वदन्ति ॥

(आ) CRC 4.20, CPS 94.32. (For similar thoughts see No. 93).

Cf. Crn 56.

Upajāti metre (Indravajrā and Upendravajrā).

1960.

घृद्धस्य च कुदारस्य पुत्रार्पितधनस्य च ।
स्नुषावचनदग्धस्य जीवितान् मरणं वरम् ॥

(आ) CRBh II 4.19 (reconstructed).
(*a*) क...दारस्य [च कु°] CRBh II.
(*c*) ...वचन...दग्धस्य CRBh II.
(*d*) जीवितात् CRBh II.

1961.

वृद्धस्य वचनं येन न श्रुतं शास्त्रमेव च ।
न विविच्य कृतं यद्वा नश्यते तस्य कर्म तत् ॥

(आ) CRT 7.9.
(*a*) वृद्धस्य CRT.

1962.

वृद्धार्को होमधूमश्च बालस्त्री निर्मलोदकम् ।
रात्रौ क्षीरान्नभक्तिश्च आयुर्वृद्धिर्दिने दिने ॥

(आ) CnT II 14.5, CnT III 7.64. (Cf. Nos. 997-8, 1038-9).
(ई) IS 6264, NT 25 (cf. NT 24).

1963.

वेश्यानामिव विद्यानां बहवः सन्ति भोगिनः ।
हृदयग्राहिणस् तासां द्वित्राः सन्ति न सन्ति वा ॥

(आ) CNI I 342.
(ई) SRBh 38.12.
(*b*) मुखं कैः कैर्न चुम्बितम् SRBh.
(*c*) °ग्राहिपस्ता° CNI I.
(*d*) विरलाः सन्ति वा न वा CNI I.

1964.

वेश्यासौ मदनज्वाला रूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥

(आ) CVNS 15.21.
(इ) BhŚ 110. (Cf. Mṛcch. 4.11).
(ई) SRBh 355.1, SRK 104.1, IS 6280.
(*a*) वाराङ्गना [वे°] SRBh (fn.), SRK (fn.).
(*b*) रूपमेवेन्धनं काष्ठं SRBh (fn.), SRK (fn.); रूपेंध° SRK.
(*c*) तेन सम्यक्प्रदीप्ता SRBh (fn.), SRK (fn.); हूयंते CVNS, SRK. (For other variants in BhŚ see BhŚ 110).

This maxim was probably incorporated in the CVNS text from BhŚ.

1965

वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं
युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकम् ।
राज्यं बालनृपं च मन्त्रिरहितं मित्रं छलान्वेषि यद्
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति शीघ्रं बुधाः ॥

(आ) CvTb 7.24, CRB 8.73, CRP 8.70, CRBh I 8.71, CRBh II 8.59, CnT II 28.2, CnT VII 63. (Cf. Nos. 48,153,294,1110).
(इ) Śts 18.1-4, PR 3, Vānary 6.
(ई) ŚP 1542, SRBh 178.1012, IS 6284.
(*a*) वेद्यं CRBh I; पापरतं CvTb; मानरतं CRP, CRBh I; मानरतं (प° CRBh II) विभुं तु (च CRBh II) विरसं CRB, CRBh I; मूर्खं परिव्रजकं Śts (see *b*).
(*b*) योधं कापुरुषं हयं SRBh; योधं कापुरुषं विटं च पुरुषं मू° CvTb; शूरं का° CRB, CRBh II; शूरं कापुरुषं विक्षुं (°भुं) च (विनं द° CRBh I) विरसं मू° CRP, CRBh I; शूरं कापुरुषं नटं कुपटनं मू° CRBh II; विवयसं स्वाध्याहीनं द्विजम् Śts; परिभ्र° CRP.
(*c*) राजानं कुमन्त्रिभिः (°भि CRBh II) परिवृतं देशं च सोपद्रवं (°पत्रं CRBh II) PR, Vānary, CRBh II, CRP, CRBh I; बालनृपं च पंच म° CvTb; बालनरेन्द्र म° Śts; °षि (°सि Śts) ŚP, Śts.
(*d*) °तां नेच्छति ये पण्डिता CvTb; मुञ्चन्तु PR; ये पण्डिताः Śts, ŚP, SRBh; येते [शी°] CRP, CRBh I, CRBh II.

Cf. Crn. 192.
Śārdūlavikrīḍita metre.

1965 A.

वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदाः ।
शरीरधर्मकोशेभ्यः क्षिप्रं स परिहीयते ॥

(आ) CNB 132.

(इ) H (HJ 3.108, HS 3.101, HM 3.102, HK 3.102, HP 3.100, HN 3.100, HH 90.25-6, HC 120.19-20). P (PT 1.97, PTem 1.89, PS 1.85, PN 2.64, PRE 1.96, PD 306.100), VCjr VI.1 (p.34).

(ई) IS 6290, SV 2839, SRHt 65.7.

(*a*) वैद्यविद्वज्जनामात्या (वैद्यसांवत्सरामात्य or °संवत्°) P, SV, SRHt.

(*b*) प्रियः सदा [प्रि°] IS.

(*c*) आरोग्यधर्मकोशेभ्यः (°षेभ्यः) P, SV, SRHt; कोषेभ्यः H.

1966.

वैष्णवाश्च पिशाचाश्च मत्कुणाश्च पिपीलिकाः ।
भस्मदर्शनमात्रेण पलायन्ते दिशो दश ॥

(आ) CVM 2.12.

1967.

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का
का जातिर्विदुरस्य यादवपतेर् उग्रस्य किं पौरुषम् ।
कुब्जायाः किमु नामरूपमधिकं किन्तत्सुदाम्नो धनं
भक्त्या तुष्यति केवलं न च गुणैः भक्तिप्रियो माधवः ॥

(आ) CRC 8.159, CPS 344.31.

(*a*) °स्य च रण CRC.

(*b*) यादवपते उग्रस्य CRC.

(*d*) हरिरतो [न च गु°] CRC, CPS.

Śārdūlavikrīḍita metre.

1968.

व्याधेः समं नास्ति शरीरशोषणं
मातुः समं नास्ति शरीरपोषणम् ।
भार्यासमं नास्ति शरीरतोषणं
विद्यासमं नास्ति शरीरभूषणम् ॥

(आ) CNG 324. (Cf. No. 1406).

Indravaṁśā metre.

1969.

व्यायामः कफनाशाय वातनाशाय मर्दनम् ।
स्नानं पित्तविनाशाय ज्वरनाशाय लङ्घनम् ॥

(आ) CvP IV 4.3, CvGt 4.3, CvTb 4.3, CM 157.

(*c*) च पित्तानाशाय [पि°] CvTb; °नाशा य on the margin CvGt.

श

1970.

शक्तः परजने दाता स्वजने दुःखजीविनि ।
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥

(आ) CVNS 14.17.
(इ) Mn 11.9.
(ई) Apar on Y 283.2-3, BrDh 2.9.10, IS 6343.
(*b*) दुःखपीडिते Govindrāja's commentary.
(*c*) °पातः IS; °पानो Mn (var.).
(*d*) धर्मः some Mn's MSs.

Cf. JSAIL 27.29.

1971.

शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु दाता भवति वा न वा ॥

(आ) CNM 117, CNMN 84, CNT IV 120.
(इ) Vet 12 (p. 155).
(ई) SRBh 70.1, IS 6365, SRHt 16.3, Subh 163 and 285.
(उ) ShD (M) 132, Vyās (C) 101.
(*b*) सहस्रेष्वपि Subh (IS).
(*c*) दशसहस्रेषु SRBh.

1972.

शनैर्विद्यां शनैरर्थान् आरोहेत् पर्वतं शनैः ।
शनैरध्वसु वर्तेत योजनान्न परं व्रजेत् ॥

(इ) In SRBh 157.204 ascribed to CV (?) 3.33. (Cf. No. 980).

1973.

शरीरमेवायतनं दुःखस्य च सुखस्य च ।
जीवितं च शरीरं च जात्यैव सह जायते ॥

(इ) GP 1.113. 59 (GPy 1.113. 60), MBh (R) 12.174.21 *cd* (the same

thought occurs very often in MBh)+12.174. 23 *ab*.

(*b*) Second च omitted MBh (printer's error).

(*c*) जवितञ्च शरीरञ्च GP; शरीरेण MBh.

This maxim was probably influenced by MBh.

1974.

शरीरे वर्तमाने तु कार्यं चैव पुनः पुनः ।
शरीरे खण्डमाने तु कार्यं सर्वं प्रणश्यति ॥

(आ) CRP 2.4, CRBh I 2.4.

(*c*) खंड° CRP; खंदमानेऽपि CRBh I.

(*d*) सर्वं विनश्यति CRBh I.

1975.

शर्करापूरिते गत निम्बवृक्षमुपार्जयेत् ।
पयसा सिञ्चितो नित्यं न निम्बो मधुरायते ॥

(आ) CNF 52, CNN 19.

(*a*) शर्कराशतभारेण (°र°) CNN, CNF (MS B).

(*b*) निववक्षम् CNF (MS).

(*c*) मिचते [सि°] CNF (MS); निणीत्यं CNF (MS B).

1976.

Transferred to No. 2036.

1977.

शशिदिवाकरयोर्ग्रहपीडनं
गजभुजंगमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥

(आ) CRC 6.26, CPS 143.24.

(इ) BhŚ 240 *ba/cd*, P (PRE 2.5, PT 2.8, PTem 2.8, PS 2.5, PP 2.15, PN 1.5, Pts 2.19, PtsK 2.20, PD 314.v, PM 2.7), H (HJ 1.52, HS 1.45, HM 1.50, HK 1.51, HP 1.38, HN 1.41, HH 13.16-7, HC 18.10-1), VCsr 21.6 *ba/cd*, Nitipradipa 4.

(ई) Anyoktyaṣṭakasaṁgraha 10.4, ŚP 443 *ba/cd* SRBh 92.68 *ba/cd*, SRK 171.14, IS 2060.

(*a*) रविनिशाक° Pts, PtsK; °कर्यो प्रह° Bh in PP; °गृह° Y_2 in BhŚ.

(*b*) गजतुरंगम° IS; गजविहंगभुजंगम° G_{3t} in BhŚ; °विहंगम° [°म°] BhŚ (W in BhŚ as above), PP, Pts, PtsK, PD, VCsr, ŚP.

(*c*) समीक्ष्य [वि°] BhŚ (W Y_3 T_1 in BhŚ as above), PP, VCsr, SRBh; निरीक्ष्य PRE, PT, PTem, PtsK, Pts. VJMy in VCsr, T_3 in BhŚ; समीक्ष [वि°] PrBh phi in PP; गृहेषु MNQ in VCsr.

(*d*) °रहां CRC; अति [इति] phi in PP; मति [मे म°] Pr in PP.

Drutavilambita metre.

1978.

शस्त्रं शास्त्रं कृषिर्विद्या अन्नं योगश्च जीवितम् ।
सुदृढमपि कर्तव्यं कृष्णसर्पमुखं यथा ॥

(आ) CNP II 227, CNG 118, CM 159.

(इ) (Cf. VCsr 14.2, VCmr 14.27, VCbr 14.1). (Cf. No. 1390).

(*b*) भाया लक्ष्मी नृपस्तथा CNG; अन्नयोगेन जी° CNP II (MS).

(*c*) सुदृढं चैव CNG.

1979.

शाखामृगस्य शाखायाः शाखां गन्तुं पराक्रमः ।
यत्पुनस्तीर्यतेऽम्भोधिः प्रभावप्रभवो हरिः ॥

(आ) CNP II 40, CM 160.

(इ) Vet 11.6, Mahān 6.16.

(*a*) शाखाया [शा° second] CNP II; शाखायां [शा° second] *cd* in Vet.

(*b*) शाखागन्तुप॰ A in Vet; शखा° B in Vet; शाखायां तु यथाक्रमं *a* in Vet; डांतु [ग°] CNP II.

(*c*) यः पुनः स्त्रीर्थ तोंभोधि CNP II; लंघितो [ती°] Mahān, D in Vet.

(*d*) प्राभावः CNP II, A in Vet; प्रभावः प्राभवो C in Vet; प्रभो B in Vet; हि सः (स B in Vet; नः A in Vet) [ह°] Vet; न प्रभुः प्रभुरेव सः *d* in Vet; प्रभावोऽयं प्रभो तव D in Vet; प्रभावोऽयं तव प्रभो Mahān.

1980.

शास्त्रं च हन्यते काव्यैः काव्यं गीतेन हन्यते ।
गीतन्तु स्त्रीविलासेन स्त्रीविलासो बुभुक्षया ॥

(आ) CPS 215.102.

1981.

शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीयम्
आराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ वशतावसन्ना ।।

(आ) CNW 65, CnT II 30.10, CnT VII 97 (cf. Nos. 6,181,527,744).
(इ) PD 305.90, VCbr II 19, Vānary. 2, ṢR 1, HS *ad* 110.18, HH 99. 21·4, MKS 72. Śto 373.10-3.
(ई) ŚKDr *ad* परिशङ्कनीयः (ascribed to Udbhaṭa), SV 2926 v.l., SRBh 176. 962, SuM 20.13, IS 6443, Subh 101 and 136 (*cb/ad*).
(उ) Ślt (OJ) 61.
(*a*) सुनिश्चलधिया परिचिन्त° VCbr, SuM, SRBh; सुचिन्तितमथो परिचिन्त° ṢR; सुनिश्चितधिया परिचिन्त° (°याऽपि हि चि° IS) PD, Śto, SV.
(*b*) सेव्यो नृपोऽपि सततं परिसेवनीयः SRBh; स्वाराधि Vānar; संसेवितो IS; नरपतिः प्रतिशङ्क° HH, HS; परिरक्षनीयः IS.
(*c*) आत्मीकृतापि SV; आत्माक्षतापि IS; युवती CNW, Vānar, SR; परिशङ्कनीया HH, HS, Śto.
(*d*) नृपेषु IS; च कुतो वशित्वं (वशत्वं IS) HS, HH, PD, ṢR, Vānar, ŚKDr; च कुतः स्थिरत्वम् VCbr, SV, SRBh, SuM; च कुतो वशित्वम् Śto.

Cf. Crn. 270.

Vasantatilakā metre.

1982.

शिरसा धार्यमाणोऽपि सोमः सौम्येन शंभुना ।
तथापि कृशतां धत्ते कष्टं खलु पराश्रयः ।।

(आ) CRC 8.155, CPS 342.27.
(ई) ŚP 753, SV 552, SRBh 96.1, IS 6457, Subh 300, SRK 108.4 and 171.19, RJ 308.
(*a*) °माणेन CPS.
(*b*) सोमेन ŚP, SV, SRBh, Subh.
(*d*) कष्टः ŚP, SRBh, SV, SRK.

1983.

शिष्टैरप्यविशेषज्ञ उग्रश्च कृतनाशकः ।
त्यज्यते किं पुनर्लाल्यैः पत्न्याप्यात्मंभरिर्नरः ॥

(आ) CNB 129.

(इ) H (HJ 3.132, HS 3.126, HM 3.128, HK 3.129, HP 3.125, HN 3.125, HH 94.256, HC 126.7-8).

(ई) SRBh 148.239, IS 6463.

(*a*) अपि विशेषज्ञा CNB; अविशेषाज्ञ IS.

(*b*) उदग्रः HJ; कृतनायकः SRBh.

(*c*) स्त्रियापि त्यज्यते नान्यैः HJ; नान्यैः SRBh.

(*d*) किम्पुनः कृपणो नरः HJ; यश्चा° SRBh; °त्म° IS; त्रिध्वा धन्वन्तरिर्ययथा IS.

1984.

शीतभीताश्च ये विप्रा रणभीताश्च क्षत्रियाः ।
अग्निभीता च या नारी त्रयः स्वर्गं न यान्ति हि ॥

(आ) CNW 96. (Cf. No. 1984).

(ई) SRBh 392.620, IS 6466.

(*d*) न गच्छति would be better.

Cf. Crn. 165.

1985.

शीतभीताश्च विप्राश्च रणभीताश्च क्षत्रियाः ।
धनाढ्यो दानभीतश्च त्रिभिः स्वर्गो न गम्यते ॥

(आ) CRC 8.163, CPS 345. 35. (Cf. No. 1984).

(*a*) विप्रश्च CRC.

(*b*) क्षत्रियः CRC, CPS.

(*d*) त्रयो स्वर्गं CRC; गच्छति [ग°] CRC.

Cf. Crn. 165.

1986.

शीतमुष्णं क्षुधा तृष्णा गर्भवासेषु दारुणाः ।
गर्भवासादृते नान्यत् कष्टात् कष्टतरं महत् ॥

(आ) CRC 6.62, CPS 160.73.

1987.

शीतांशौ यदि सौरभं यदि भवेदिन्दीवरे रक्तिमा
माधुर्यं यदि विद्रुमे तरलता कन्दर्पचापे यदि ।
रम्भायां यदि विप्रतीपबलनं लब्धोपमानं तदा
तद् वक्त्रं तदिहेक्षणं तदधरस्तद्भ्रूस्तदूरुद्वयम् ॥

(आ) CRC 8.87, CPS 249.79.

(*d*) °वक्त्रं च CPS (*contra metrum*).

Śārdūlavikrīḍita metre.

1988.

शीतेऽतीते वसनमशनं वासरान्ते निशान्ते
लीलारम्भः कुवलयदृशा यौवनान्ते विवाहः ।
जीर्णे देहे हरिचरणयोः सेवनाकर्तुमीहा
तोयेऽतीते भवति विफलं सेतुबन्धः प्रबन्धः ॥

(आ) CNF 100.

(इ) Nītipradīpa 14 *ab*, (KSH 528).

(ई) IS 6471, SRBh 178.1003 *ab*, Subh 243 *ab*.

(*a*) वशनंमशनं Subh.

(*b*) क्रीडारम्भः Nīt°, SRBh; °दृशां Nīt°, SRBh; विवाहम् SRBh.

(*c*) सेतोर्बन्धः (न्धं SRBh) पयसि गलिते प्रस्थिते लग्नचिन्ता (स्नेहभङ्गे च मैत्री Subh; चलति वार्धके तीर्थयात्रा SRBh) Nīt°, Subh, SRBh; देही CNF (MS) and E. Teza in GSAI 1.45; °रणयो CNF (MS) and E. Teza; सेवनकर्त्तुमिह्य CNF (MS) and E. Teza (°मिहा).

(*d*) सर्वञ्चैतद्भवति विफलं स्वस्वकाले व्यातीते Nīt°; दानं दद्यादवसरगते पृष्ठतः किं करोति Subh; वित्तेऽतीते वितरणमतिं कर्तुमिच्छन्ति मूढाः SRBh; भवती CNF (MS) and E. Teza; विपुलं बंधः प्रबंध CNF (MS) and E. Teza; विफलो बद्धसेतोः प्र° reconstructed by E. Teza (GSAI 1.45).

Mandākrāntā metre.

1989.

शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः ।
न हि किंचिदसाध्यं वै लोके शैलवतां भवेत् ॥

(आ) CNŚC 93, CNŚl 93, CNŚ 91, CNŚIV 92, CPS 366.42.
(ई) MBh (MBh ⌊Bh⌋ 12.124.15, MBh ⌊R⌋ 12.124.15, MBh ⌊C⌋ 12.4564.)
(उ) SS (OJ) 165.

This maxim was probably incorporated in the four texts belonging to the CN version from MBh.

Cf. JSAIL 30.140.

1990.

Transferred to No. 2071.

1991.

शुष्केन्धने वह्निरुपैति वृद्धिं
मूर्खेषु शोकश्चपलेषु कोपः ।
कान्तासु कामो निपुणेषु विद्या
धर्मो दयावत्सु महत्सु धैर्यम् ॥

(आ) CRBh II 7.52.
(इ) P (PRE 3.92, PT 3.106 *da/bc*, PS 3.65, PN 3.55), Vānaraṣṭaka 6.
(ई) SRBh 173. 873, IS 6500.
(*a*) शु° वृ° उ° वह्नि tr. A in PS; शुष्केन्धनं IS; वह्निम् CRBh; वृद्धे IS.
(*b*) मूखेषु कामश्चापलेषु च दोषः A in PS; मूर्खेषु काम चापलेषु च सर्वे दोषाः N in PS; मूढेषु PRE, PT; बालेषु Vān, SRBh; रणेषु IS; दोषं [को°] PS.
(*c*) कान्तेषु PRE, PT; निधनेषु CRBh II; निपुणो म...धर्मो A in PS; वित्तं PS, Vān, SRBh; चित्तं IS.
(*d*) दानं [ध°] CRBh II; दया च IS; महत्स Vān. (printer's error); महत्धैर्य्यं A in PS.

Indravajrā metre.

1992.

शून्यमश्वं गजं मत्तं वृषभं काममोहितम् ।
अन्तःपुरगतं भूपं दूरतः परिवर्जयेत् ॥

(आ) CvṢ 8.11, CvA 8.11, CvW 8.10, CvL I 8.11. (Cf. Nos. 108 and 1584).

(*a*) अश्वंस्त्रत्तं ग° CvW; अश्चगंजत्तं CvA (corrupt).

(*c*) अंत CvW; नारी [भू°] CvL I.

(*d*) दूरत CvW; दूरितः CvL I.

1993.

शृङ्गी तुम्बी जलौकाश्च यथा कर्षन्ति शोणितम् ।
तथा कर्षन्ति धर्माणां दासीवेश्यापरस्त्रियः ॥

(आ) CNN 42.

1994.

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढम् आविशन्ति न पण्डितम् ॥

(आ) CNŚC 103, CNŚl 103, CNŚ 101, CNŚL 89, CNŚPK 82, CPS 355.4.

(इ) MBh (MBh ⌊Bh⌋ 3.2.15; 11.2.13; 12.26.20; 12 168. 31; 12.307.2 and 18.5.48, MBh ⌊R⌋ 3.2.15;11.2.13;12.25.20; 12.174.42; 12.330. 20 and 18.5.61, MBh ⌊C⌋ 3.62; 11.67;12.751; 12.6497-8;12.12483 and 18.204-5), H (HS 1.2, HM 1.2, HK 1.3, HP 1.2, HN 1.2, HH 6.22-3).

(ई) SRBh 162.431, SRHt 266.7, IS 6525.

(उ) ŚS (OJ) 512, DhN (P) 343.

(*b*) हर्षस्थानश° MBh (R) 12.25.20;12.174.42 and 18.5.61, SRHt.

This maxim was probably incorporated in the four texts of the CN version from MBh.

Cf. JSAIL 30.20.

1995.

शोको नाशयते विद्यां शोको नाशयते धृतिम् ।
शोको नाशयते धर्मं नास्ति शोकसमो रिपुः ॥

(आ) CvP IV 3.11, CvGt 3.9, CvTb 3.13.

(ई) (Cf. Subh 190 ⌊IS 6520⌋).

(*a*) शोकेन नश्यते प्रज्ञा CvTb; प्रज्ञा [वि°] CvGt.

(*b*) शोकेन नश्यते धति CvTb; नसयति CvTb.
(*c*) शोकेन नश्यते धर्मो CvTb.
(*d*) न शोकेन समो रिपु CvTb.

1996.

शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् ।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥

(आ) CVNS 14.15.
(इ) Mn 3.57. (Cf. MBh ⌊R⌋ 13.46.4).
(ई) PDhS 1.2; 112.1-2, SMPh 143.25, BVP 212.23, VRK 418.1211, VyK, Prajñapasthala 130, IS 6534.
(*a*) यामयो BVP, VRK.
(*b*) प्रणश्यत्याशु VRK.
(*c*) न च शो PDhS (var.).
(*d*) ताद्धि BVP.

This maxim was probably incorporated in CVNS from Mn.

Cf. JSAIL 27.12.

1996 A.

शौनकायं नीतिसारो विष्णुः सर्वव्रतानि च ।
हरीरितो हरादेश्च अजाद्व्यासाच्छ्रुतः स्मृतः ॥

(इ) GPy 1.115.83 (closing stanza).
(*ad*) In GP this stanza reads.

शौनकाय नीतिसारं विष्णुः सर्वव्रतानि च ।
कथयामास वै पूर्वं तत्र शुश्राव शङ्करः ।
शङ्कराच्च श्रुतो व्यासो व्यासादस्माभिरेव च ॥

1997.

श्मशानान्ते रतेरन्ते पुराणान्ते च या मतिः ।
सा मतिर्दीयतां नाथ मम जन्मनि जन्मनि ॥

(आ) CPS 306.43.

1998.

श्मशाने नीयमानं तु भर्तारमनुयाति या ।
पदे पदेऽश्वमेधेन यजते नात्र संशयः ॥

(आ) CNP II 43, CM 162.
(इ) Vet 16.19.
(*a*) श्मशानं B in Vet; च [तु] *a* in Vet.
(*b*) यानुगच्छति [अनु°] Vet (*ad* in Vet as above); अनुया च ते CNP II.
(*c*) ऽश्वसेधस्य Vet; ऽश्वमेधं च CNP II, *d* in Vet.
(*d*) फलं प्राप्नोति सा सती Vet (*a* in Vet as above but सा न [नात्र]; लभते नात्र सं° *d* in Vet; यज्ञफलं लभते ना° *c* in Vet) ; जायते CNP II.

1999.

श्रुतं दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननं
न रत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोकपतिना ।
तदर्थं धर्मार्थौ सुतविषयसौख्यानि च ततो
गृहे लक्ष्म्यो मान्याः सततमबला मानविभवैः ॥

(आ) CRC 8.83, CPS 247.75.
(इ) Varāhamihira's Bṛhatsaṁhitā (Bibl. Ind. 74.4).
(ई) ŚP 3087, SRBh 252.46, IS 6562.
(*a*) हृदा° [नृ°] CRC, CPS ; °जनकं CRC, CPS.
(*c*) विभववरसौ° ŚP, SRBh ; ततः CRC, CPS.
(*d*) °बलाः CRC, CPS ; सन्ति [मा°] CRC, CPS.

Śikhariṇī metre.

2000.

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां कोपयन्ति च नायकान् ॥

(आ) CNP II 251, CNT IV 240, CM 164.
(*a*) बहुविद्वानि CNP II.
(*c*) आश्रेयसि प्रवर्त्तानां CNP II.
(*d*) नायकाः CNP II.

2001.

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ॥

(आ) CRBh II 8.72. Cf. No. 453,

(इ) BhŚ 54, MK 43.

(ई) SRBh 75.12, SRK 103.5, IS 6586, Alaṁkārakaustubha (KM 66) 360 *ba/cd*, Pras 18.7, Subh 100 *ba/cd*.

(*a*) श्रुतं E_{3t} in BhŚ; श्रुतं नै° F_4 in BhŚ; च [न] E_3 in BhŚ; न च E_5 in BhŚ; तु [न] F_5 in BhŚ.

(*b*) दाने च E_{3t} in BhŚ; च [तु] E_3 HIM_1 in BhŚ; कंकरेन (°नेन IS) E_{3t} in BhŚ; कुण्डलेन Y_{1B} in BhŚ.

(*c*) आभाति [वि°] B_1,$E_{0-2,3c,5}$, F_2XY_1 in BhŚ; खलु सज्जनानां SRK, SRBh; °परायणा D in BhŚ; °क्रराणां F_{2-4}, $Y_{1B,2,4-6}$ $G_{1t,v\ 4}$; °कुलानां $F_{4m\ v}$ $J_{1,3}$ $Y_{3,7,8}$ TG_1 M in BhŚ ; °लयानां J_2 G_{3tv} in BhŚ.

(*d*) °कारैर्न SRK W_{1-3} in BhŚ; च [न] D in BhŚ; तु [न] SRK, F_1, $W_{1\ 3}$ in BhŚ ; न तु F_5 in BhŚ ; मंडनेन G_1 $M_{2,3}$ in BhŚ; भूषणेन $M_{4,5}$ in BhŚ.

Upajāti metre (Indravajrā and Upendravajrā).

2001 A.

श्रोत्रियस्य च भार्या या परवेश्माभिलाषिणी ।
कुत्सिता त्यक्तलज्जा च सा जरा न जरा जरा ॥

(आ) CvS 7.6. CvA 7.6, CvL I 7.6 (latter part of *b* and *cd* illegible).

(Cf. Nos. 770, 836-9).

2002.

श्लोकमात्रं पठित्वैव यथाशास्त्रं य आचरेत् ।
सर्वक्लेशयुतोऽपि स शुद्धः क्रियासु पण्डितः ॥

(आ) CRT 8.50.

2003.

श्लोकानामीति सप्तत्या नीतिसारसमुच्चयम् ।
चन्द्रगुप्ताय चाणक्यः संक्षेपेणोपदिष्टवान् ॥

(आ) CNSap 72 (second of the two closing stanzas).

ष

2004.

षट्पदः पुष्पमध्यस्थो यथा सारं समुद्धरेत् ।
तथा सर्वेषु काव्येषु सारं गृह्णाति बुद्धिमान् ॥

(आ) CNI I 14, CNG 204, CNT IV 265.

(ई) IS 6605, Subh 283.

(*a*) षट् वद्दः CNI I (*sic !*).

(*c*) शास्त्रेषु [का°] CNI I ; कार्येषु [का°] Subh.

2005.

षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यम् अनसूया क्षमा धृतिः ॥

(आ) CVNS 17.21. Cf No. 1256.

(इ) MBh (MBh ⌊Bh⌋ 5.33.69, MBh ⌊R⌋ 5.32,85, MBh ⌊C⌋ 5.1051).

(ई) IS 6614.

This maxim was probably incorporated in the CVNS text from MBh. Cf. JSAIL 30.38.

2006.

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

(आ) CNŚC 109, CNŚl 109.

(इ) MBh (MBh ⌊Bh⌋ 5.33.66, MBh ⌊R⌋ 5.32.82, MBh ⌊C⌋ 5.1048), H (HJ 1.34, HS 1.29, HM 1.33, HK 1.34, HP 1.25, HN 1.26, HH 10.25-6, HC 14.16-17).

(ई) SRBh 163.441, IS 6615, Kk 56.

(*a*) पुरुषणैव IS.

(*c*) मिद्रा [नि°] IS ; तन्द्रा CNŚC, CNŚl, H, SRBh ; तन्द्रीर् IS; क्रोधम् CNŚC. CNŚl,

(*d*) दीर्घसूत्रिता IS.

This maxim was probably incorporated into the two texts of the CN version from MBh.

Cf. JSAIL 30.37 ———

स

2007.

संदष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
शीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं मुधैव मथितो मूढैः सुरैः सागरः ॥

(आ) CnT II 31.2, CnT VII 13.

(इ) Amar 32.

(ई) Amd 61.107, ŚP 3668, SV 1303, Śatakāvalī 32, Skm 2. 126. 5, JS 277.10, SRBh 317.5, IS 6807, Subh 18.

(*a*) संदष्टधरपल्लवे ŚP, SV, SRBh.

(*b*) भवेति [श] Subh.

(*c*) सीत्का° ŚP, SV, SRBh ; सललितं [स°] Subh.

(*d*) ध्रभाय]मु°] ŚP, SRBh, Subh ; वृथैव [मु°] SV ; सागरं Subh.

Śārdūlavikrīḍita metre.

2008.

संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैल- शिलासंघातकर्कशम् ॥

(आ) CSC I 3.73.

(इ) BhŚ 335, PP 2.151. Cf. Dṛṣṭāntaśataka 37 (KSH).

(ई) SV 200, SRBh 45.27, SRHt 209.9, SRK 18.73, SuM 28.14, IS 6876, Subh 306.

(*a*) संपद्यम° IS ; महता CSC I ; चितं CSC I ; वित्तं N in PP ; चेतो SV, SRHt.

(*b*) भवेद् उत्यल° IS; भवेद् उत्पल° B_1 $E_{01,2\cdot c,5}$ $J_1Y_{1,3}$ $T_{1,2}$ G_5 in BhŚ, SuM ; भवेद् दुत्य° CSC I.

(*c*) विपत्सु Y_2 in BhŚ ; ऽपि [च] E_3 in BhŚ ; तु [च] G_2 in BhŚ ; चं IS ; महाशैले CSC I.

(*d*) महाशलं $F_{1,2}$ in BhŚ ; महाघोल B_1 in BhŚ ; शिलाशैल° E_{3t} in BhŚ; °शीला° IS; °संधात IS.

2009.

संपूर्णकुम्भो न करोति शब्दम्
अर्धो घटो घोषमुपैति नित्यम् ।
विद्वान् कुलीनो न करोति गर्वं
गुणैर्विहीना वहु जल्पयन्ति ॥

(आ) CNI I 344.
(ई) SRBh 173. 870, IS 6882, Subh (in IS).
(उ) NŚ (OJ) 1.9.
(*b*) सम्यक् [नि°] Subh ; नूनम् SRBh.
(*c*) नरो यो [कु°] Subh.
(*d*) विद्याविहीनो CNI I ; विहीनो IS ; वादयन्ति Subh ; जल्पन्ति मूढास्तु गुणैर्विहीनाः SRBh.

Upajāti metre (Indravajrā and Upendravajrā).

2010.

संयोगा विप्रयोगाश्च जातानां प्राणिनां ध्रुवम् ।
बुद्बुदा इव तोयेषु भवन्ति न भवन्ति च ॥

(आ) CVNS 11.22. (Cf. No. 1057).
(इ) MBh (MBh ⌊Bh⌋ 12.27.28 , MBh ⌊R⌋ 12.27.28, MBh (C) 12.828).
(ई) IS 6624.
(*a*) °योगान्त MBh (MBh ⌊Bh⌋ as above).
(*b*) ध्रुवाः MBh (C).

This maxim was probably incorporated in CVNS from MBh.
Cf. JSAIL 30.83.

2011.

संसारं च असारं च सारं वस्तुचतुष्टयम् ।
दानं परोपकारश्च सत्संगश्च शिवार्चनम् ॥

(आ) CRBh II 8:95.
(*a*) संसारं CRBh II ; my change to असारं.
(*d*) च on the margin.

2012.

स एवाहं पार्थस्तदपि वरलब्धं धनुरिदं
त एवामी बाणाः प्रमथितसुराराातिपृतनाः ।
समस्ता वृष्णीनां हलधरमुखानां युवतयो
ह्रियन्ते गोपालैर्विधिरथ बलीयान्न पुरुषः ॥

(आ) CRC 6.27, CPS 144.25.

(*b*) बाणा CPS.

Śikhariṇī metre

2013.

सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥

(इ) GP 1. 114.3.

2014.

सगुणो निर्गुणो वापि सहायो बलवत्तरः ।
तुषेणापि परित्यक्तस् तण्डुलो नाङ्कुरायते ॥

(आ) CNW 101. (Cf. Nos. 1025 and 1728).

(इ) (Cf. PtsK 3.58, HJ 1.36).

(ई) ŚKDr *ad* निर्गुणः (ascribed to Udbhaṭa), IS 6661, TP 480.

(*c*) परिभ्रष्टस् ŚKDr.

2015.

सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः सन्तः सङ्गस्य भेषजम् ॥

(आ) CNP II 268.

(इ) H (HJ 4.93, HS 4.89, HM 4.90, HP 4.93, HN 4.93, HK 4.95, HH 113.19-20, HC 152.10-1), MP 37.23.

(ई) SRBh 87.17, SRHt 9.6, IS 6674.

(*b*) च [चेत्] HM, HC.

(*c*) सद्भिरेव स क° SRHt.

(*d*) सङ्गः [सन्तः] SRHt; सतां सङ्गो हि Hit, MP.

Cf. JSAIL 24.56.

2016.

सच्छिद्रो मध्यकुटिलः कर्णः स्वर्णस्य भाजनम् ।
धिग् दैवं निर्मलं नेत्रं पात्रं कज्जलभस्मनः ॥

(आ) CNN 68.
(ई) ŚP 447, SRBh 90.4 (in SRBh ascribed mistakenly to SV 447).
(*c*) चक्षुः [ने°] SRBh.
(*d*) कज्जलस्मना CNN (MS).

2017.

स जीवति यशो यस्य कीर्तिर्यस्य स जीवति ।
अयशोऽकीर्तिसंयुक्तो जीवन्नपि मृतोपमः ॥

(आ) CNPN 70.
(इ) Nitisāra 7 (KSH 505).
(ई) SRBh 98.4, IS 6683.
(*c*) यशःकीर्तिपरिभ्रष्टा CNPN (MS).

2018.

सततं दानधर्मा च द्विजशुश्रूषणे रता ।
देवाग्निगुरुभक्ता च सा भार्या भोगमोक्षदा ॥

(आ) CRC 1.46, CPS 14.39. (Variant of No. 454). (Cf. No. 2057).

2019.

सततं दानसंयुक्ता सततं धर्मवत्सला ।
इच्छया या क्रियाकर्त्री सर्वसौभाग्यवर्द्धिनी ॥

(आ) CvP IV 8 8, CvTb 8.8 *ab* and 8.9 *cd*, CM 166. (To be read together with Nos. 607 and 2021).
(*c*) इच्छायावत् क्रि° CvP IV; °कत्री CvP IV (corrected to. °कर्त्री); कत्री CvTb.
(*d*) °वर्दिनी CvP IV, CvTb.

2020.

सततं धर्मबहुला भर्तृभक्ता च सर्वदा ।
सततं प्रियवक्त्री च सततम् ऋतुकामिनी ॥

(आ) CRT 1.16.

(इ) GP 1.108.20.
(*b*) सततं च पतिप्रिया GP.
(*d*) सततं ऋतु° GP.

2021.

सततं भर्तृभक्ता च सततं भक्ष्यभोजना ।
सततं च दयायुक्ता सततं रतिगामिनी ॥

(आ) CvP IV 8.7, CvTb 8.9 *ab* and 8.8 *cd*, CM 165. (To be read together with Nos. 607 and 2019). (Cf. No. 1751).
(*a*) भर्तरिभक्ता CvP IV.
(*b*) सततं सौष्यभाजनम् CvTb.
(*c*) या [च] CvTb.
(*d*) स्वानुगा° CvP IV; °गामीनी CvTb.

2022.

सत्यं ब्रूयात् प्रियं ब्रूयान् न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः ॥

(आ) CNŚC 111, CNŚl 111.
(इ) Mn 4.138, PS 1.24, (cf. G 9.68, Vi 71.73-4, Y 1.132, Devala, Dakṣa and Yama in Āpar p. 174-6).
(ई) BrDh 2.6.6, SRHt 9.3, IS 6732, Subh 158, NT 141, TP 476. Cf. K (Kangle) 5.4.12.
(*a*) ब्रूयात् [ब्रू° second] IS.
(*c*) ब्रूयात् CNŚC, CNŚl; प्रिया च अनृतं IS.

This maxim was probably incorporated in the two texts of the CN version from Mn.

2023.

सत्यं शौचं शमं शीलं संयमं नियमं तथा ।
प्रविशन्ति बहिर्मुक्त्वा विटाः पण्याङ्गनागृहे ॥

(आ) CNP II 113, CM 169. (Cf. No. 1471).
(इ) Vet 21.6.9. (Cf. BhŚ 197, Amitagati's Subhāṣitasaṁdoha 24.2,4,6, 13 and 14, Kṣemendra's Kalāvilāsa 9.27 etc.).

(*a*) सत्यं शीलं यशः शौचं A in Vet; स° शी° यतः पुंसां *d* in Vet; समं [श°] CNP II (MS); सत्वं *c* in Vet.

(*b*) संयमो नियमोद्यमः *d* in Vet; शसयं नियमं मयं B in Vet; स व [सं°] CNP II (MS); संशयं *e* in Vet; यमम् [त°] Vet (श्रुतं A in Vet).

(*c*) °श्यन्ति CNP II (MS); युक्ता CNP II (MS).

(*d*) विरगोनाङ्गनागृहे CNP II (MS); विष्टा A in Vet; पण्यांगनां गणे *d* in Vet.

2024.

सत्यपूतं भवेद् वाक्यं वस्त्रपूतं जलं पिबेत् ।
श्रद्धापूतं चरेद् धर्मं मनःपूतं समाचरेत् ॥

(आ) CNP II 239. CM 168. Cf. CN "G", CNI I 24 has *ad* of this maxim and *ab* of CN "G" (v.l.). See No. 487.

(*a*) वदेद् [भ°] CNI I.

(*c*) श्रा° CNP II; च दे धर्मं CNP II.

2025.

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं शीलेन रक्ष्यते ॥

(आ) CRCa II 26, CRT 6.6. (Variant of No. 930). (Cf. No. 1958).

(इ) MBh (MBh ⌊Bh⌋ 5.34.37, MBh ⌊R⌋ 5.33.38, MBh ⌊C⌋ 5.1132), GP 1.113.10.

(ई) SRHt 195.94, IS 6742.

(उ) SS (OJ) 168.

(*a*) रक्षते धर्मं CRCa II.

(*b*) रक्षति CRCa II.

(*c*) रक्षते CRCa II; पात्रं [रू°] CRT, GP.

(*d*) वृत्तेन MBh, SRHt; रक्षति CRCa II.

This maxim was probably incorporated in the CRCa II and CRT texts from MBh.

f.C JSAIL 30.44.

2026.

सत्ये प्रतिष्ठितः कालो धर्मः सत्ये प्रतिष्ठितः ।
उदधिः सत्यवाक्येन मर्यादा नैव मुञ्चति ॥

(आ) CNN 39.

2027.

सत्सङ्गः केशवे भक्तिर् गङ्गाम्भसि निमज्जनम् ।
असारे खलु संसारे त्रीणि साराणि भावयेत् ॥

(आ) CNŚC 57, CNŚI 57, CNŚ 56, CNŚIV 57, CPS 363 31.

2028.

सदा वक्रः सदा क्रूरः सदा पूजामपेक्षते ।
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः ॥

(आ) CNI I 346.
(ई) SV 2308, SRBh 364.15.
(*b*) पूजमिछतिनिसशग CNI I; मानधनापहः SV.

2029.

सदा समशनैर्भाव्यं श्लाघ्यं वदति वैभवे ।
सुखपेयपयः क्षारा वरा कूपाः सरोवरम् ॥

(आ) CvP IV 3.2. Partly illegible and reconstructed.
(ई) (Variant of IS 6762; Subh 322).
(*a*) समं CvP IV.
(*c*) सुषपेय° CVP IV.

2030.

सदृशे पुरुषत्वेऽपि करपादौ शिरोदरे ।
एकः प्रभुः परो दास इति दैवं विजृम्भितम् ॥

(आ) CRC 6.29, CPS 145.27.
(*d*) दैववि° CPS.

2031.

सद्भावो नास्ति वेश्यानां स्थिरता नास्ति संपदाम् ।
विवेको नास्ति मूर्खाणां विनाशो नास्ति कर्मणाम् ॥

(आ) CNP II 45, CnT II 9.12 and 22.5, CnT III 7.8 and 55.6, CnT V 20, CnT I 8.

(इ) VCsr VII 4.
(ई) SuM 23.44, IS 6768. (Cf. Subh 101 ⌊IS 6702⌋).
(*a*) वैश्यानां QE in VCsr.

2032.

सद्भिः सङ्गं प्रकुर्वीत सिद्धिकामः सदा नरः ।
नासद्भिरिहलोकाय परलोकाय वा हितम् ॥

(आ) CRCa II 2.
(इ) GP 1.108.2.
(ई) IS 6771.
(*b*) सिद्धिकामः CRCa II.
(*c*) °रिंहलो° IS.
(*d*) वाहितः CRCa II; my change to चाहितम् IS.

2033.

सद्वृत्तोऽप्येष जात्या सरसफलभरो रत्नकान्त्युज्ज्वलश्रीः
क्लान्तानामार्त्तिहर्त्ताप्यतिशयमधुरास्वादविश्रान्तिदोपि ।
हृद्यन्तर्भिन्नभिन्नान् वहति पृथुरहो दाडिमः कोशगर्भान्
तत्राश्नास्यन्ति के वा कृतकफलमुखेष्वञ्जसा कर्कशेषु ॥

(आ) CRC 3.72, CRB 3.71, CRP 3.65-66, CRBh I 3.64, CRCa I 3.52, CPS 70.50.
(*a*) जात्यां CRC, CPS; °भृतो CRP, CRBh I.
